CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणपतये नमः ॥

श्री विद्वन्मनोरंञ्जनी

—: संकलनकर्ता :—

वैद्य पं० श्रीराम मिश्र कविराज शास्त्री
का० व्या० पुराणतीर्थ—आयुर्वेदाचार्य
कर्मकाण्ड कोविद्—ज्योतिर्विद

श्रीराम विजय कुमार मिश्र
रानीगंज
वर्द्धमान

श्रीराम आयुर्वेद भवन
गंगा लहरी-तिलक मार्ग
पो०-रानीगंज,
जि०-वर्द्धमान (प० बं०)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणपतये नमः ॥

श्री विद्वन्मनोरंज्जनी

कथावाचक—उपदेशक एवं गोष्ठी में
प्रयुक्त—सुभाषित श्लोक—सवैया—छन्द—
और राजस्थानी दोहे—तथा कहावतें,

—: संकलनकर्ता :—

वैद्य पं० श्रीराम मिश्र कविराज शास्त्री
का० व्या० पुराणतीर्थ—आयुर्वेदाचार्य
कर्मकाण्ड कोविद्—ज्योतिर्विद

श्रीराम विजय कुमार मिश्र
रानीगंज
वर्द्धमान

श्रीराम आयुर्वेद भवन
गंगा लहरी-तिलक मार्ग
पो०-रानीगंज,
जि०-वर्द्धमान (प० बं०)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशक :

सम्पत कुमार मिश्र
विजय कुमार मिश्र
राजकुमार मिश्र
रमेश कुमार मिश्र

"मूल्यम्—दसमुद्रा"

मुद्रक :

उदयाचल प्रेस
३१, मुखराम कानोड़िया रोड,
हवड़ा ७११११०१
फ़ोन : ६०-५४८८, २०-४१७२, २०-७५६५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



वैद्य पं० श्रीराम मिश्र

याज्ञिक भूषण, ज्योतिर्विद, कर्मकाण्ड कोविद, आयुर्वेदाचार्य
का० व्या० पुराणतीर्थ, कविराज शास्त्री,
भिषक् रत्न, राजकीय कथाभट्ट

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्री हेरम्बाय नमः

श्री सरस्वत्यै नमः

श्री गुरवे नमः

॥ शाण्डिल्य विद्वज्जनरञ्जनी ॥

विद्वन्मनोरञ्जनमस्तु पद्यैः
चेतश्च सद्योऽद्य विकासमेतु
नवं वयो भातु नु वार्द्धकेऽपि
रसायनं पद्यमयं निषेव्यम् ॥ १ ॥

सुभाषितानि हृद्यानि राजस्थानीय भाषया
कथावाचक मोदाय गुम्फ्यन्ते रसवृद्धये ॥ २ ॥

—:०:—

काम क्रोध मद लोभ की जब लग मन नें खान
तब लग पंडित मूरखा—दोनों एक समान ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यौ तौ शंखकपालभूषितकरौ मालास्थिमालाधरौ
देवौ द्वारवतीश्मशाननिलयौ नागारिगोवाहनौ ॥
द्वित्र्यक्षौ बलिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ
पापं वो हरतां सदा हरिहरौ श्रीवत्सगंगाधरौ ॥ १ ॥

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषित रतिर्लोकापवादाद्भयम् ॥
भक्तिः शूलिनि शक्तिरात्मदमने संसर्ग मुक्तिः खले—
ष्वेते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ २ ॥

निष्कंचनस्य भगवद्भजनोन्मुखस्य
पारं परं जिगमिषो भवसागरस्य ॥
संदर्शनं विषयिणामथ योषिताञ्च
हा हन्त हन्त विषभक्षणतोऽप्य साधुः ॥३॥

परिवदतु जनो यथा तथा वा
ननु मुखरो न वयं विचारयामः ॥
हरिरसमदिरामदातिमत्ता
भुवि विलुठाम नटाम निर्विशाम ॥ ४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सिंहो वली द्विरद शूकर मांसभोजी
संवत्सरेण कुरुते रतिमेकवारम् ॥
पारावतस्तृण शिखा कणमात्रभोगी
कामीभवे दनुदिनं वदकोऽत्रहेतुः ॥ ५ ॥

——

भ्रातः तिष्ठ तले तले विटपिनां ग्रामेषु भिक्षामट
स्वच्छन्दं पिव यामुनं जलमलं चीराणि कन्था कुरु ।
सम्मानं कलयातिघोरगरलं नीचापमानं सुधाम्
श्रीराधामुरलीधरौ भज सखे वृन्दावनं मात्यज ॥

——

जातः सूर्यकुले पिता दशरथः क्षोणीभुजामग्रणीः
सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः ।
दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयम्
रामो येन विडम्बितोऽपि विधिना चान्ये जने का कथा ॥

——

कान्ता कटाक्षविशिखा नलुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्चन लोभपाशैः
लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥

———

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रुद्रोऽद्रिं जलधिं हरिर्दिविपदो दूरं विहायाश्रिताः
भोगीन्द्राः प्रबला अपि प्रथमतः पातालमूले स्थिताः ।
लीना पद्मवने सरोजनिलया मन्येऽर्थिसार्थाद्भिया
दीनोद्धारपरायणाः कलियुगे सत्पुरुषाः केवलम् ॥

कोऽहं ब्रूहि सखे स्वयं स भगवानार्यः स को राघवः
के यूयंवत नाथ नाथ किमिदं दासोऽस्मि ते लक्ष्मणः ।
कान्तारे किमिहास्यहे वतसखे देव्यागतिर्मृग्यते
का देवी जनकाधिराजतनया हा जानकि क्वासि हा ॥

न भवति भवति च न चिरम्
भवति चिरं चेत् फले विसं वादी ।
कोपः सत्पुरुषाणाम्
तुल्य स्नेहेन नीचानाम् ॥

दुर्वृत्तसंगतिरनर्थ परम्पराया
हेतुः सतां भवति किं वचनीयमत्र ।
लंकेश्वरो हरति दाशरथेः कलत्रम्
प्राप्नोति बन्धनमसौ किल सिन्धुराजः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शृणु हृदयरहस्यं यत्प्रशस्तं मुनीनाम्
न खलु न खलु योषित्सन्निधिः संनिधेयः ।
हरति हि हरिणाक्षी क्षिप्रमक्षिक्षुरग्रैः
पिहित शम तनुत्रं चित्तमप्युत्तमानाम् ॥

भ्रमन् वनान्ते नवमंजरीषु
न षट्पदो गन्धफलीमजिघ्रत् ।
सा किं न रम्या स च किं न रन्ता
बलीयसी केवलमीश्वरेच्छा ॥

यैर्नश्रुतं भागवतं पुराणं नाराधितो यैः पुरुषः पुराणः
हुतं मुखे नैवधरामराणां तेषां वृथा जन्म गतं नराणाम् ॥

श्री विष्णो श्रवणे परीक्षिदभवद् वैयासकिः कीर्तने
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ॥
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः
सर्वस्यात्म निवेदने बलिरभूत् कृष्णाप्तिरेषां फलम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एष ब्रह्मातिवृद्धस्तपति दिनपतिश्चं चलो मातरिश्वा
दिग्वासा नीलकंठस्त्रिदशपतिरसौ गर्वित क्षीयतेऽब्जः
इत्थं देव्या विचिन्त्य भ्रमरकुलकलागीत शब्दप्रफुल्ला
दत्तामाला मुरारे सुरतरुकुसुमालंकृता पातु युष्मान् ॥

—

ब्रह्मारुद्रः कुमारो हरिवरुणयमा वन्हिरिन्द्रकुवेरः
चन्द्रादित्यौ सरस्वत्युदधियुगनगा वायुरुर्वी भुजंगाः ॥
सिद्धानद्योऽश्विनौ श्रीर्दितिरदिति सुता मारतश्चण्डिकाद्या
वेदास्तीर्थानि यज्ञा गण वसु मुनयः पान्तुनित्यं ग्रहाश्च ॥

—

भक्त बावले ज्ञानी अल्हड
योगी बडे निखट्टू
कर्मकाण्डी ऐसे डोले
ज्यों भाडे के टट्टू

—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ शाण्डिल्य विद्वज्जनरञ्जनी ॥

॥ श्रीः ॥

नमो गुरुभ्यो गुरु पादुकाभ्यो
नमः परेभ्यः पर पादुकाभ्यः
आचार्य सिद्धेश्वर पादुकाभ्यो
नमोस्तुते विप्र पदांबुजेभ्यः ॥१॥

आनन्द मानन्द करं प्रसन्नम्
ज्ञान स्वरूपं निज भाव युक्तम्
योगीन्द्र मीड्यं भव रोग वैद्यम्
श्रीमद् गुरुं नित्य महं नमामि ॥२॥

लक्ष्मीपते कमल नाभ सुरेश विष्णो
वैकुण्ठ कृष्ण मधुसूदन पुष्कराक्ष ।
ब्रह्मण्य केशव जनार्दन वासुदेव
देवेश देहि कृपणस्य करावलम्बम् ॥३।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

या माया मधुकैटभप्रमथिनी या माहिषोन्मूलिनी
या धूम्रेक्षण चण्डमुण्ड मथिनी या रक्तबीजाशनी ।
शक्तिः शुंभ निशुंभ दैत्य दलिनी या सिद्ध लक्ष्मीपरा
सा चण्डी नव कोटि शक्ति सहिता मां पातु विश्वेश्वरी ।४।

सित मकर निषण्णां शुभ्रवर्णां त्रिनेत्राम्
करधृत कलशोद्यत्सोत्पलामत्यभीष्टाम् ।
विधिहरिहररूपां सेन्दुकोटीरजुष्टां
कलित सित दुकूलां जाह्नवीं तां नमामि ॥५॥

आदावादि पितामहस्य निगम व्यापार पात्रे जलम्
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् ।
भूयः शंभु जटा विभूषणमणिर्जन्होर्महर्षे रियम्
देवी कल्मष नाशिनी भगवती भागीरथी दृश्यते ॥६॥

अविघ्नम् कुरुते नित्यं विघ्नं परिहिनस्ति यः
यात्रा मंगल सिद्ध्यर्थ मेकदन्तं नमामि तम् ॥७॥

कौलीरे चित्रकूटे हिमगिरि विवरे शस्त्र जालांध कारे
सौराष्ट्रे सिन्धु देशे मगध पुर वरे कोसले वा कलिंगे ।
कर्णाटे कौंकणे वा भृगु सुत नगरे कान्यकुब्जे स्थितान्वा
सर्वस्मात्सर्वदाबाह्यपभृतिभयतः पातु वः क्षेत्रपालः ॥८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अंगश्यामलिमच्छटाभिरभितो मन्दीकृतेन्दीवरम्
जाड्यं जागुड रोचिषां विदधतं पट्टाम्बरस्य श्रिया ।
वृन्दारण्य निवासिनं हृदि लसत् दाभाभिरामोदरम्
राधास्कन्द निवेशितो ज्ज्वलभुजम् ध्यायेम दामोदरम् ॥९॥

सिन्दूरपूरपरिशोभितपूर्णशुण्डम्
श्री कुण्ड तुल्य युग कुण्डल मण्डि गण्डम् ।
तुण्डेन विघ्नमय कानन भंग चण्डम्
वन्दे महेश गिरिजामहिमांशुपिण्डम् ॥१०॥

सकल वाञ्छित सिद्धि करं परम्—
विविध विघ्न विदारण दारुणम्
सकल निर्झर वृन्द निसेवितम्
गणपतिं प्रथमं सततं स्मरेत् ॥११॥

आनन्द रूप करुणा कर विश्व वन्धो
संताप चन्द्र भव वारिधि भद्र सेतो ।
हे विघ्न मृत्यु दलनामृत सौख्य सिन्धो
श्रीमन् विनायक तवांघ्रियुगं नताःस्मः ॥१२॥

गज वदन मचिन्त्यं तीक्ष्ण दंष्ट्रं त्रिनेत्रम्
वृहदुदरमशेषं भूति राजं पुराणम् ।
अमर वर सुपूज्यं रक्तवर्णं सुरेशम्
पशुपति सुत मीशं विघ्नराजं नमामि ॥१३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुंकुम वर्ण चतुर्भुज युक्तम्
नाग मुखं मुकुटं शर कण्डम् ।
अंकुश मोदक दन्त शुभांशम्
सदृशमग्नि गणेश स्वरूपम् ॥१४॥

गलद्दान गण्डं मिलद् भृंग खण्डम्
चलच्चारु शुण्डं जगत्प्राण शौण्डम् ।
लसद्दन्त काण्डं विपद्भंग चण्डम्
शिव प्रेम पिण्डं भजे वक्रतुण्डम् ॥१५॥

गजाननं चारु विशाल नेत्रम्
मौंजीधरं मूषक वाहनं च ।
चतुर्भुजं चंचल युग्म कर्णम्
गणाधिपं शंभुसुतं नमामि ॥१६॥

यस्यार्चनेन विधिना किमपीह लोके
कर्म प्रसिद्ध मिति मानफलं प्रसूते ।
तं संततं सकल साधक चित्त वृत्तिम्
चिन्तामणिं सुर गणाधिपतिं नमामि ॥१७॥

कर्मादौ विबुधा कृतांजलि पुटा ध्यायन्ति यं संततम्
प्रौढं विघ्न वनं प्रयाति विलयं यन्नाम संकीर्त्तनात् ।
दुःखध्वांत हरः समृद्धि निकरः लम्बोदरः सुन्दरः
दम्पत्योः सुसुखं तनोतु सकलं हेरम्ब विघ्नेश्वरः ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मधुकर वृत गण्डं भाल मालीन्दु खण्डम्
विलसित कर दण्डं विघ्न नाशैक चण्डम् ।
वितरित वुध पण्डं संल्लसत्स्थूल पिण्डम्
विदलित रिपु काण्डं नौमि तं वक्र तुण्डम् ॥१९॥

निजै रौपधि स्तर्पयन्तं कराद्यैः
सुरौघान्कलाभिः सुधास्रापिणीभिः ।
दिनेशांशु सन्ताप हारं द्विजेशम्
शशांकस्वरुपं गणेशं नमामः ॥२०॥

स्फुर दमल किरीटं किंकिणी कंकणार्हम्
चलदलक कपोलं कुण्डल श्रीमुखाब्जम् ।
तुहिन गिरि मनोज्ञम् नील मेघाम्बराढ्यम्
हलमुसल विशालं कामपालं समीडे ॥२१॥

सहार वक्षः शिखी पिच्छ चूलः
कच्छोटिका वद्धः कटि प्रदेशः ।
गांश्चारयन् दण्ड धरो वनान्ते
गायन् हरिर्नो वितनोतु भद्रम् ॥२२॥

मम न भजन शक्तिः पादयोस्ते न भक्तिः
न च विषय विरक्ति र्ध्यान योगे न शक्तिः ।
इति मनसि सदाहं चिन्तयन्नाद्य शक्तेः
रुचिर वचन पुष्पैरर्चन संचिनोमि ॥२३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यक्षराज महं ध्याये कुवेरं निधि नायकम्
आवाहयामि देवत्वामिहा याहि कृपां कुरु ॥२४॥

यो ब्रह्मरुद्र शुक नारद भीष्म मुख्यैः
आलक्षितो न सहसा पुरुषस्य तस्य ।
सद्यो वशीकरण तूर्ण मनन्त शक्तिः
तं राधिका चरणरेणु महं स्मरामि ॥२५॥

श्रीरामचन्द्राश्रित पारि जातः
समस्त कल्याण गुणाभिरामः ।
सीतामुखाम्बूरूह चंचरीको
निरन्तरं मंगल मातनोतु ॥२६॥

गणेश ब्रह्मेश सुरेश शेषा
सुराश्च सर्वे मुनयो मुनीन्द्रा ।
सरस्वती श्रीगिरिजादिकाश्च
नमन्ति देव्यः प्रणमामि तं विभुम् ॥२७॥

बृहस्पतिं दैत्य गुरुं महीजम्
शनैश्चरं चन्द्रसुतं च राहुम् ।
दिवाकरं चन्द्रमसं सुकेतुम्
विभूति यज्ञे सततं नमामि ॥२८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्य प्रपूजा करणेन भक्त्या
भवन्ति नूनं धनिनो मनुष्याः ।
धनेच्छुसंचिन्तित पाद पद्मम्
धनेश्वरं तं सततं नमामि ॥२९॥

रक्तांभोज दलाभिराम नयनं पीताम्बरालंकृतम्
श्यामांगं द्विभुजं प्रसन्न वदनं श्री सीतया शोभितम् ।
कारुण्यामृत सागरं प्रियगणैः भ्रात्रादिभि र्भावितम्
वन्दे विष्णु शिवादि सेव्यमनिशम् भक्तेष्ट सिद्धिप्रदम् ॥३०॥

रमानाथं पूर्णं दशरथ सुतं ज्ञानवपुषम्
धराधीशं शान्तं दशमुख रिपुं भूपति वरम् ।
वरेण्यं लोकेशं कपिपति पदं यज्ञ फलदम्
नमामि श्रीरामं जनक तनया लालित पदम् ॥३१॥

भवाब्धि पोतं भरताग्रजं तम्
भक्तप्रियं भानुकुल प्रदीपम् ।
भूतत्रिनाथं भुवनाधि पत्यम
भजामि रामं भवरोग वैद्यम् ॥३२॥

बलं न गात्रेषु ममास्ति किंचित्
कपर्दिकाया अधिपोऽस्मि नाहम् ।
बलं धनं मेतु तव प्रपत्तिः
कपीन्द्र रक्षां कुरु मे सदा त्वम् ॥३३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वदाश्रयत्वान्न विभेमि भूतात्
स्पृशन्ति नांगानि कदापि रोगाः ।
तवानुकम्पा यदि मे सदा स्यात्
कचोपि वक्रो न हि मे तदास्यात् ॥३४॥

अंजनी गर्भ संभूतः कपीन्द्रः सचिवोत्तमः
राम प्रिय नमस्तुभ्यं हनुमन् रक्ष सर्वदा ॥३५॥

कृतघ्नोऽहं कामी कुटिल पथगामी व्यसनिनो
दुराचारी नारी रमण रसिकोऽपि प्रति दिनम् ।
महालोभी दंभी तव चरणयोरद्य पतितः
त्वदन्यो मे नान्यः शरण मिह लोकेऽञ्जनि सुत ॥३६॥

युवतयो नव यौवन गर्विता
सुजघना घनपीन पयोधराः ।
मुखर नूपुर चारु रवोन्मदाः
तव गिरन्ति यशो मधुर स्वरैः ॥३७॥

महा वलिष्ठो मतिमान् महिष्ठः
श्रीराम पादांवुजपूर्णनिष्ठः ।
श्रेष्ठः कवीनां प्लवतां वरिष्ठः
त्वमिष्ट देवो जगताम्विशिष्ट ॥३८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सरस मोदक पायस पिण्डिका
फल सुगन्ध धराः कतिचिन्नराः ।
धवल धामनि दामिनि दीपिते
सघनता मुप यान्ति च योषितः ॥३९॥

तव मनोहर मूर्ति मुदीक्षितुम्
निकट वर्ति सुदूरतरा नराः ।
प्रति घटीं प्रति वासर मुत्सुकाः
परिजनैः प्रचलन्ति मुहुर्मुहुः ॥४०॥

भ्राजद् वक्र जटाधरम् त्रिनयनम् नीलांजनाद्रि प्रभम्
दोर्दण्डात्त गदा कपोल मरुण स्रगन्थ वस्त्रावृतम् ।
घंटा घुर्घुर मेखला ध्वनि मिलत् धुंकार भीमं विभुम्
वन्दे संहित सर्पकुण्डलधरं श्री क्षेत्रपालं सदा ॥४१॥

रक्ताम्बरं ज्वलन पिंग जटा कलापम्
ज्वालावली कुटिल चन्द्रधरं प्रचण्डम् ।
वालार्क कोटि फल कांचन धातु वर्णम्
देवी सुतं वटुक नाथ महं नमामि ॥४२॥

यं यं यं यक्ष रूपं दशदिशि वदनं भूमि कम्पायमानम्
सं सं सं हार मूर्ति शिर मुकुट जटा शेखरं चन्द्रविम्बम्
दं दं दं दीर्घकेशं विकृत नखमुखं चोर्ध्व रेखा कपालम्
पं पं पं पापनाश प्रणत पशुपतिं भैरवं क्षेत्र पालम् ॥४३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आनन्द मन्थर पुरन्दर मुक्त माल्यम्
मौलौ हठेन निहितं महिषासुरस्य ।
पादाम्बुजं भवतु वो विजयाय मंजु
मंजीर शिञ्जित मनोहर मम्बिकायाः ॥४४॥

बन्धूकाभां त्रिनेत्रां पृथु जघन लसत्कुक्षिमुद्रक्तवस्त्राम्
पीनोत्तुंग प्रवृद्ध स्तन जघन भरां यौवनारं मरूढाम् ।
सर्वालंकार युक्तां सरसिज वदना मिन्दु संक्रान्त मौलिम्
ह्यम्बांपाशांकुशेष्टा भय वरद करा मम्बिका तां नमामि ॥४५॥

जन विदित कदम्बे सर्व लोकावलम्बे
ललित पृथु नितम्बे मुक्ति दानावलंबे ।
अधर विजित विम्बे मूर्ध्नि छिन्देन्दु विम्बे
हत दनुज कदम्बे रक्ष मां स्वे कुटुम्बे ॥४६॥

स्वभक्त वत्सलेऽनघे सदापवर्ग भोगदे
दरिद्र दुःख हारिणि त्रिलोक शंकरीश्वरि ।
भवानि भीम अम्बिके प्रचण्ड तेज उज्ज्वले
भुजा कलाप मण्डिते नमोस्तुते महेश्वरि ॥४७॥

आदाय दक्षिण करेण सुवर्ण पात्रम्
दुग्धान्न पूर्ण मितरेण च रत्नपात्रम् ।
अन्न प्रदान निरतां नव हेम वर्णाम्
अम्बां भजे कनक भूषण माल्य शोभाम् ॥४८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तप्त स्वर्ण निभा शशांक मुकुटा रत्नप्रभा भासुरा
नानावस्त्र विराजिता त्रिनयना भूमि रमाभ्यां युता ।
दर्वी हाटक भाजनं विदधती रम्योच्च पीनस्तनी
नृत्यन्तं शिवमा कलय्य सततं ध्येयान्नपूर्णेश्वरीम् ॥४९॥

ध्यायेद्देवीं नव शशिमुखीं पंच विंबाधरोष्ठीम्
विद्योतन्तीं कुच युगभरां नम्र कल्पांग यष्टिम् ।
ईषद्धासोल्लसित वदनां चन्द्र सूर्याग्नि नेत्राम्
श्वेतांगीं तामभय वरदां श्वेत पद्मासनस्थाम् ॥५०॥

गुणत्रयातीत नीरस्त दोष
समस्त कल्याण गुणैक सिन्धुः ।
प्रणम्यतां नित्य विहार शीलः
श्री राधिका माधव आर्त्तबन्धुः ॥५१॥

अक्रोध वैराग्य जितेन्द्रियत्वम्
क्षमा दया शान्ति मनः प्रसादाः ।
अभीति निर्लोभ सुदातृ भाषा
ज्ञानस्य चिन्हानि दशात्मकानि ॥५२॥

पंकाभिसिक्त सकलावयवं विलोक्य
दामोदरं वदति कोप वशात् यशोदा ।
त्वं शूकरोऽसि गत जन्मनि पूतनारे
इत्युक्त सस्मित मुखोऽवतु वो मुरारिः ॥५३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वन्दे सर्व जगद् विहारमतुलं वन्देऽन्धकध्वंशिनं
वन्दे देव शिखामणिं शशिनिभं वन्दे हरेर्वल्लभम् ।
वन्दे नाम भुजंग भूषणधरं वन्दे शिवं चिन्मयम्
वन्दे भक्त जनाश्रयं च वरदं वन्दे शिवं शंकरम् ॥५४॥

वन्दे पंच मुखांबुजं त्रिनयनं वन्दे ललाटेक्षणम्
वन्दे व्योम गतं जटा सुमुकुटं चन्द्रार्ध गंगाधरम् ।
वन्दे भस्मकृता त्रिपुण्ड्र जटिलं वन्देऽष्ट मूर्त्यात्मकम्
वन्दे भक्तजना— ॥५५॥

वन्दे कालहरं हरं विषधरं वन्दे मृडं धूर्जटीं
वन्दे व्योमगतं दयामृत निधिं वन्दे नृसिंहापहम् ।
वन्दे शैल सुतार्ध भाग वपुषं वन्दे भवं त्र्यम्बकम्
वन्दे भक्तजना— ॥५६॥

मौलौ चन्द्रदलं गले च गरलं जूटे च गंगा जलम्
व्यालं वक्षसि चा नलं च नयने शूलं कपालं करे ।
वामांगे सततं नमामि दधतम् प्रालेय शैलात्मजाम्
भक्त क्लेशहरं हरं स्मरहरं कर्पूर गौरं परम् ॥५७॥

उग्रस्य जन्म कृतवर्ति गिरिजा तपस्याम्
यत्पाद पंकज रजो विबुधा लसन्ति ।
आशां वरं भुजगराज विभूषितांगम्
तं चन्द्रमौलि मनिशं हृदि भावयामि ॥५८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सत्यं तपो ज्ञानमहिंसिता च
विद्वत् प्रणामश्च सुशीलता च ।
एतानि यो धारयते स विद्वान्
न केवलं यः पठते स विद्वान् ॥५९॥

निद्रा प्रियो यः खलु कुम्भकर्णो
हतः समीपे सह रघूत्तमेन ।
वैधव्य मासाद्य ततस्य कान्ता
श्रोतुं समायाति कथा पुराणम् ॥६०॥

श्यामाभिरामं नयनाभिरामम्
गुणाभिरामं वचनाभिरामम् ।
विश्वप्रणामं कृतभक्तकामम्
श्रीरामचन्द्रं सततं नमामि ॥६१॥

लीला शरीरं रणरंगधीरम्
बिश्वैकसारं रघुवंश हारम् ।
गंभीरनादं जित सर्ववादम्
श्रीरामचन्द्रं सततं नमामि ॥६२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बंशीधरं सुन्दरमन्द हासम्
वर्हावतं संवल वालयुक्तम् ।
वृन्दावनस्थं नवनीरदाभम्
गोपाल वालं सततं नमामि ॥६३॥

अवैष्णवमुखाद् गाथा न श्रोतव्या कदाचन
शुक शास्त्रं विशेषेण न श्रोतव्यमवैष्णवात्
वैष्णवार्थ—ब्राह्मणः ॥६४॥

कृष्ण क्वासि करोषि किं पितरिति श्रुत्वैव मातर्वचः
सा शंकं नबनीत चौर्य विरतो विश्रभ्यतामब्रवीत् ।
मातः कंकण पद्मराग महसा पाणिर्मयाऽऽतप्यते
तेनायं नवनीत भाण्ड विवरे विन्यस्य निर्वापितः ॥६५॥

या दृष्टा निखिलाघ संघशमनी स्पृष्टा वपुः पावनी
रोगाणामभि वन्दिता निरसनी सिक्तान्तका त्रासिनी ।
प्रत्यासक्ति विध्वंसिनी भगवतः कृष्णस्य संरोपिता
न्यस्ता तच्चरणे विमुक्ति फलदा तस्यै तुलस्यै नमः ॥६६॥

द्यूताद् राज्य विनाशनं नलनृपप्राप्तोथवा पाण्डवः
मद्यात् कृष्ण नृपश्च राघव पिता पापर्द्धितो दूषितः ।
मांसाच्छेणिक भूपतिश्च नरके चौर्याद् विनष्टानके
वेश्यात् कृत पुण्यको गत धनोऽन्य स्त्रीभृतो रावणः ॥६७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्यूतं च मासं च सुरा च वेश्या
पापर्द्धि चौर्यं परदार सेवा ।
एतानि सप्त व्यसनानि लोके
घोरातिघोरं नरकं नयन्ति ॥६८॥

युष्माकं काचिदन्या जगदुपरि समुद्भूत लावण्यवन्या
धन्या शैलेन्द्र कन्या त्रिभुवन जननी विश्वमान्यावदान्या ।
निश्शंकं शंकरांके तडिदिव लसिता प्रोल्लसन्ती हसन्ती
रक्षा दक्षा पिपक्षा वलि विलयकरी शांकरी शंकरोतु ॥

दोर्भि युक्तां चतुर्भिः स्फटिक मणिमयीं यक्ष मालां दधाना
हस्तेनैकेन पद्मं सित ममलं शुकं पुस्तकं चापरेण ।
या सा कुन्देन्दु शंख स्फटिक मणिनिभा भासमाना समाना
सामे वाग्देवतेयं निवसतु वदने शारदा सुप्रसन्ना ॥

श्रीमच्चन्दन चर्चितोज्वलवपुः शुक्लाम्बरं मल्लिका
माला लालित कुन्तला प्रविलसन्मुक्तावलिः शोभिता ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्व ज्ञान निधान पुस्तकधरा रुद्राक्ष मालाधरा
बाग्देवी वदनाम्बुजे वसतु मे त्रैलोक्य माता चिरम् ॥

पाशांकुश धरा पाणी वीणा पुस्तक धारिणी
मम वक्त्रे वसेनित्यं दुग्ध कुन्देन्दु निर्मला ।
अक्ष सूत्रांकुश धरा पाश पुस्तक धारिणी
मुक्ताहार समायुक्ता वाचि तिष्ठतु मे सदा ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥

श्री नन्द नयनानन्दम्
यशोदानन्द कन्दुकम् ।
गो गोप गोपिका गोपम्
राधानाथं भजाम्यहम् ॥ १ ॥

क्षीरसारमपहृत्य शंकया
स्वीकृतं यदि पलायनं त्वया ।
मानसे मम घनान्धतामसे
नन्दनन्दन कथं न लीयसे ॥ २ ॥

स्वयं सुरेशः श्वसुरो नगेशः
सखा धनेशस्तनयो गणेशः ।
तथापि भिक्षां कुरुते महेशः
ललाट वन्हेरयमेव शेषः ॥ ३ ॥

मयूर पिच्छ मुकुटं वेणुवादनतत्परम्
राधिका सहितं वन्दे गोपालं श्याम सुन्दरम् ॥

यदा यदा यान्ति नरा हि जान्हवीम्
रुदन्ति पापानि वदन्ति चाप्रियम् ।
अरे कृतघ्ना नितरां नराधमा
स्वयं समुत्पाद्य निहन्तुमुद्यताः ॥ ४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अयि तुरंग कुरंग शिशोर्जवम्
जयसि चेदिह किं तव पौरुषम् ।
यदि विधातृवशेन मनागपि
स्खलसि विश्व विसारि यशः क्षतिः ॥५॥

तृणानि शुष्काणि वने चरित्वा
पीत्वापि तोयान्यमृतं स्रवन्ति ।
यद् गोमयाद्याश्च पुनन्ति लोकान्
गोभिर्न तुल्यं धनमस्ति किंचित् ॥ ६ ॥

न दुःखं दहने घर्षे छेदने ताडनेऽपि मे ।
एकं मे विषमं दुःखं गुंजया सह तोलने ॥ ७॥

किमकारि न कार्पण्यं कस्यालंघि न देहली ।
अस्य दग्धोदरस्यार्थे किमनाटि न नाटकम् ॥ ८॥

मृतामम त्रयोदारा विद्या बुद्धिविभूतयः ।
चतुर्थी दुर्गतिः साध्वी मुंचन्तं मां न मुंचति ॥९॥

आयव्ययं च मध्यस्था व्ययमेव सुहृज्जनाः
ज्ञातयः शत्रवश्चैव पश्यन्त्यायं नतु व्ययम् ॥१०॥

नाथे कृतपदघातः
चुलुकिततातः सपत्निकासेवी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति दोषादिव रोषात्
माधवयोषा द्विजं त्यजति ॥ ११ ॥

मानुषी करण रेणुरस्ति ते
पादयोरिति कथा प्रथीयसी ।
क्षालयामि तव पादपंकजे
नाथ दारु दृषदस्य काभिदा ॥ १२ ॥

दोषाकरः शिरसिभाति गले द्विजिह्वः
पाषाणजा सहचरी पशुरन्तरंगः ।
दुःखं निवेदयति को भवदन्तिके मे
त्वं च त्रिलोचन निमीलितलोचनोऽसि । १३ ।

सीमन्तनी यस्य गृहेऽन्न पूर्णा
त्रिलोक रक्षां कुरुतेऽन्न दानैः ।
भिक्षाचरः सोऽपि कपालपाणिः
ललाट लेखो न पुनः प्रयाति ॥ १४ ॥

वोधयन्ति न याचन्ते भिक्षुकाः पात्रपाणयः
दर्शयन्त्येव लोकानामदातुर्गतिरीदृशी ॥ १५ ॥

परं प्रचण्डा कटु वाक्य वादिनी
विवाद शीला परगेह गामिनी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मौखर्य युक्ता च पतीष्टनाशिनी
त्यज्येत भार्या दशपुत्र पुत्रिणी ॥१६॥

पूर्णोऽपि कुंभो न करोति शब्दम्
रिक्तो घटो घोषमुपैति घोरम्
विद्वान् विनीतो न करोति गर्वम्
वहूनि जल्पन्ति गुणैर्विहीनाः ॥ १७ ॥

अनाहूता स्वयं यान्ति रसास्वाद विलोलुपाः ।
निवारिता न गच्छन्ति मक्षिका इव भिक्षुकाः ॥ १८ ॥

यदि रामा यदि च रमा
यदि तनयो विनयधीगुणोपेतः ।
तनयात् तनयोत्पत्तिः
सुरवर नगरे किमाधिक्यम् ॥ १९ ॥

वासः प्रसूतिः खलु योग्यताया
वासो विहीनं विजहाति लक्ष्मीः ।
पीताम्बरं वीक्ष्य ददौ तनूजान्
दिगम्बरं वीक्ष्य विषं समुद्रः ॥ २० ॥

यस्य तनुरूह कुहरे
नटनं ब्रह्माण्ड कोटीनाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तमिमं गोपकृशांगी
लोचनभंगी विघूर्णयति ॥ २१ ॥

हन्यात् द्विषमविनीतम्
किन्तु न शरणागतं द्विषं हन्यात् ।
दीपस्तिमिर विनाशी
दलयति नाधोगतं तिमिरम् ॥ २२ ॥

न वा ताडनात् तापनाद् वन्हि मध्ये
न वा च्छेदनात् क्लिश्यमानोऽहमस्मि ।
सुवर्णस्य मेऽसह्य दुःखं तदेवम्
यतो मां जना गुंजया तोलयन्ति ॥ २३ ॥

मौखर्यं लघुता हेतुर्मौनमुन्नति कारकम्
मुखरं नूपुरं पादे कंठे हारो विराजते ॥ २४ ॥

क्षुत्तृषा शास्त्रयो दारा मयि जीवति नान्यगाः ।
तासा माशा महासाध्वी मुंचन्तं मां न मुंचति ॥२५॥

दुष्टस्य संगतिरनर्थ परंपराया
हेतुः सतां भवति किं कथनीयमत्र ।
लंकेश्वरो हरति दाशरथेः कलत्रम्
प्राप्नोति बन्धनमहो किल सिन्धु राजः ॥२६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दातावलिः प्रार्थयिता रमेशो
दानं मही वाजि मखस्य कालः ।
दातुः फलं वन्धन मेव जातम्
नमोस्तु देवाय यथेष्ट कर्त्रे ॥ २७ ॥

कार्येषु मंत्री करणेषु दासी
धर्मेषु पत्नी क्षमया धरित्री ।
स्नेहेषु माता शयनेषु रंभा
रंगे सखी लक्ष्मण सा प्रियामे ॥ २८ ॥

चत्वारो धन दायादा धर्माग्नि नृप तस्कराः ।
तेषां ज्येष्ठावमानेन त्रयः कुप्यन्ति बान्धवाः ॥ २९ ॥

कान्ता वियोगः स्वजनापमानो
रणस्य शेषः कुनृपस्य सेवा ।
दरिद्र भावो विषमा सभा च
विनाऽग्निनैते प्रदहन्ति कायम् ॥ ३० ॥

यथा चतुर्भिः कनकं परीक्ष्यते
निघर्षण च्छेदन ताप ताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते
त्यागेन शीलेन गुणेन कर्मणा ॥ ३१ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गस्थितानामिह जीवलोके
चत्वारि चिन्हानि वसन्ति देहे ।
दान प्रसंगो मधुरा च वाणी
देवार्चनं ब्राह्मण तर्पणं च ॥ ३२॥

सरोगता साधु जनेषु वैरम्
परोपतापो द्विज वेद निन्दा ।
अत्यन्त कोपः कटुका च वाणी
नरस्य चिन्हं नरकागतस्य ॥ ३३ ॥

दीपो भक्षयते ध्वान्तं कज्जलं च प्रसूयते
यदन्नं भक्षते नित्यं जायते तादृशी प्रजा ॥ ३४ ॥

गन्धः सुवर्णे फलभिक्षुदण्डे
नाकारि पुष्पं खलु चन्दनस्य ।
विद्वान् धनी भूपति दीर्घजीवी
धातुः पुरा कोऽपि न बुद्धिदोऽभूत् ॥३५॥

दरिद्रता धीरतया विराजते
कुवस्त्रता शुभ्रतया विराजते ।
कदन्नता चोष्णतया विराजते
कुरूपता शीलतया विराजते ॥ ३६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वौषधीनाममृता प्रधाना
सर्वेषु सौख्येष्वशनं प्रधानम् ।
सर्वेन्द्रियाणां नयनं प्रधानम्
सर्वेषु गात्रेषु शिरः प्रधानम् ॥ ३७ ॥

हस्ती स्थूलतनुः स चांकुशवशः किं हस्तिमात्रोंऽकुशः
दीपे प्रज्वलिते प्रणश्यति तमः किं दीप मात्रं तमः ।
वज्रेणापि हताः पतन्ति गिरयः किं वज्रमात्रा नगाः
तेजो यस्य विराजते स वलवान् स्थूलेषु कः प्रत्ययः ॥३८॥

न दुर्जनः साधु दशामुपैति
बहु प्रकारैरपि शिक्ष्यमाणः ।
आमूल सिक्तः पयसा घृतेन
न निम्ब वृक्षो मधुरत्वमेति ॥ ३९ ॥

न वेत्ति यो यस्य गुण प्रकर्षम्
स तं सदा निन्दति नात्र चित्रम् ।
यथा किराती करिकुंभ लब्धाम्
मुक्तां परित्यज्य विभर्ति गुंजाम् ॥ ४० ॥

त्यजन्ति मित्राणि धनैर्विहीनम्
दाराश्च भृत्याश्च सुहृद् जनाश्च ।
तं चार्थवन्तं पुनरा श्रयन्ते
ऽतोऽर्थोहिलोके पुरुषस्यवन्धुः ॥ ४१ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आर्तेषु विप्रेषु दयान्वितश्च
यच्छ्रद्धया स्वल्पमुपैतिदानम् ।
अनन्तपारं समुपैति राजन्
यद्दीयते तन्न लभेद् द्विजेभ्यः ॥ ४२ ॥

गुणायन्ते दोषा सुजन वदने दुर्जन मुखे
गुणा दोषायन्ते किमिति जगतां विस्मयपदम् ।
महामेघः क्षारं पिबति कुरुते वारि मधुरम्
फणि क्षीरं पीत्वा वमति गरलं दुःसहतरम् ॥ ४३ ॥

हे हेरम्ब किमम्ब रोदिसि कथं कर्णौ लुठत्यग्निभूः
किन्ते स्कन्ध विचेष्टितं ममपुरा संख्या कृता चक्षुषाम् ।
नंतत्ते प्युचितं गजास्य चरितं नासा मिमीतेऽम्बमे
तावेवं सहसा विलोक्य हसिता व्यग्रा शिवा पातु वः ।४४।

विद्या तीर्थे जगति विबुधा साधवः सत्यतीर्थे
गंगा तीर्थे मलिन मनसो योगिनो ध्यानतीर्थे
धारा तीर्थे धरणि पतयोः दानतीर्थे धनाढ्याः
लज्जा तीर्थे कुल युवतयोः पातकं क्षालयन्ति ॥ ४५ ॥

अन्धं वधिर तनुते
लक्ष्मीर्जनस्य को दोषः ।
हालाहलस्य भगिनी
यन्न मारयति तच्चित्रम् ॥ ४६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रत्नाकरस्तव गृहं गृहिणी च पद्मा
किं देयमस्ति भवते जगदीश्वराय ।
आभीर वाम नयनाहृत मानसाय
दत्तं मनो यदुपते कृपया गृहाण ॥ ४७ ॥

कालः सम विषमकरः
परिभव सम्मानदः कालः
कालः करोति पुरुषम्
दातारं याचितारं च ॥ ४८ ॥

अपराधो भवत्येव तनयस्य पदे पदे
को परः सहते लोके केवलं मातरं विना ॥ ४९ ॥

असारे संसारे किमपि नहि सारं भगवति
पदांभोजादन्यत्सुखकर महोमोक्ष जनकम् ।
ततो हित्वा सर्वं धनसुत कलत्रादिकमुमा
पदांभोजं शश्वन्नमत जपतः ध्यायत जनाः ॥५०॥

तुष्टोहि राजा यदि सेवकेभ्यो
भाग्यात्परं नैव ददाति किंचित् ।
अहर्निशं वर्षति वारिवाहः
तथापि पत्रं त्रितयः पलाशः ॥ ५१ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सस्यानि स्वयमत्ति चेद्वसुमती मातासुतं हन्ति चेत्
वेलामम्बुनिधिर्विलंघयति चेद्भूमिं दहेत्पावकः ।
आकाशं जनमस्तके पतति चेदन्नं विषं चेद्भवेत्
अन्यायं कुरुते यदा क्षिति पतिः कस्तं निरोद्धुं क्षमः ।५२।

अवला यत्र प्रबला
बालो राजा निरक्षरो मंत्री ।
नहि नहि तत्र धनाशा
जीवित आशापि दुर्लभाभवति ॥ ५३ ॥

अवसर पठिता वाणी
गुणगण रहितापि शोभते पुंसाम् ।
रति समये रमणीनाम्
भूषा हानिस्तु भूषणं भवति ॥ ५४ ॥

व्यालश्रितापि विफलापि सकंटकापि
वक्रापि पंकिलभवापि दुरासदापि ।
गन्धेन बन्धुरसि केतकि सर्व जन्तो
एको गुणः खलु निहन्ति समस्तदोषान् ॥ ५५ ॥

एको बटुः दर्भ कुशाग्रपाणिः
वने बनैः सिंचति वाल चूतान् ।
आम्राश्च सिक्ताः पितरश्च तृप्ता
एका क्रिया द्व्यर्थकरी प्रसिद्धा ॥ ५६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निर्द्रव्यं पुरुषं सदैव विकलं सर्वत्र मन्दादरम्
तात भ्रातृ सुहृज्जनादि कुपितं दृष्ट्वा न संभाषितम् ।
भार्या रूपवती कुरंग नयना स्नेहेन नालिंगिता
तस्माद्द्रव्यमुपार्जयाशु सुमते द्रव्येण सर्वे वशाः ॥५७॥

माता निन्दति नाभि नन्दति पिता भ्राता न संभाषते
भृत्यः कुप्यति नानु गच्छति सुतः कान्ता च नालिंगते ।
अर्थं प्रार्थन शंकया न कुरुतेऽप्यालाप मात्रं सुहृत्
तस्माद्द्रव्यमुपार्जयाशु सुमते द्रव्येण सर्वे वशाः ॥५८॥

कान्तं वक्ति कपोतिकाकुलतया नाथान्तकालोऽधुना
व्याधोऽधो धृत चाप सज्जित शरः स्येनः परिभ्राम्यति ।
इत्थं सत्यहिना सदष्ट इषुणा श्येनोपि तेना हतः
तूर्णं तौतु यमालयं प्रतिगतौ दैवी विचित्रा गतिः ॥५९॥

निर्वाण दीपे किमु तैल दानम्
चौरे गते वा किमु सावधानम् ।
वयो गते किं वनिता विलासः
पयो गते किं खलु सेतुबन्धः ॥ ६० ॥

प्राप्तव्यमर्थं लभते मनुष्यो
देवोपि तं लंघयितुं न शक्तः ।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं नहि तत्परेषाम् ॥ ६१ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम्
छिन्न श्छिन्नः पुनरपि पुनः स्वादुमानिक्षु दण्डः ।
दग्धं दग्धं पुनरपि पुनः कांचनं कान्त वर्णम्
प्राणान्तेऽपि प्रकृति विकृति जांयते नोत्तमानाम् ॥६२॥

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके
वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः ।
तत्राप्येक फलेन मूर्ध्नि पतता भग्नं सशब्दं शिरः
प्रायोगच्छति यत्र भाग्य रहितस्तत्रापि यान्त्यापदः ।६३।

कुटिला लक्ष्मीर्यत्रप्रभवति
न सरस्वती वसति तत्र ।
प्रायः श्वश्रू स्नूषयोः
न दृश्यते सौहृदं लोके ॥ ६४ ॥

पौलस्त्यः कथमन्य दार हरणे दोषं न विज्ञातवान्
अक्षैश्चापि युधिष्ठिरेण रमता ज्ञातो न दोषोनुकिम् ।
रामेणापि वने न हेमहरिणस्या संभवो लक्षितः
प्रत्यासन्न विपत्तिमूढमनसां प्रायो मतिः क्षीयते ।६५।

बाल सखित्वम कारण हास्यम्
स्त्रीषु विवाद मसज्जन सेवा
गर्दभयानमसंस्कृत वाणी
षड्भिर्ना लघुतामुप याति ॥ ६६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रति क्षणे मृत्युहरं निजायुः
न वेद मूढो विषयेषु सक्तः ।
भेको यथा व्याल मुखे प्रविष्टः
स मक्षिकां द्वेष्टि विनष्ट बुद्धिः ॥ ६७ ॥

कस्यचित्किमपि नो हरणीयम्
मर्म वाक्यमपि नोच्चरणीयम् ।
श्रीपतेः पदयुगं स्मरणीयम्
लीलया भवजलं तरणीयम् ॥ ६८ ॥

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः
सम इह परितोषो निर्विशेषो विशेषः ।
सतु भवति दरिद्री यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान्को दरिद्री ॥ ६९ ॥

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा वहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रू हि दीनं वचः ॥७०॥

तावत्सर्व गुणालयः पटुमतिः साधुः सतां वल्लभः
शूरः सच्चरितः कलंक रहितो मानीकृतज्ञः कविः
यावन्निष्ठुरवज्रपातसदृशो देहीति नो भाषते
तस्माद्वाक्यमिदं ममशृणु सखे मा ब्रू हि दीनं वचः ॥७१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशितां कुशेन समदो दण्डेन गो गर्दभौ
व्याधिर्भेषज संग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषम्
सर्वस्यौषधमस्ति शास्त्र विहितं मूर्खस्य नास्त्यौषधम् ।७२।

मूर्खत्वं हि सखे ममापि रुचिरं तस्मिन्यदष्टौ गुणाः
निश्चिन्तो बहु भोजनेष्वभिरुचिः रात्रौ दिवा सुप्यते ।
कार्याकार्य विचारणान्ध वधिरो मानापमानौ समौ
कृत्वासर्व जनस्य मूर्धनिपदं मूर्खः सुखं जीवति ॥ ७३ ॥

काके शौचं द्यूतकारे च सत्यम्
छीवे धैर्यं मद्यपे तत्व चिन्ता ।
सर्पे शान्तिः स्त्रीषु कामोपशान्तिः
राजा मित्रं केन दृष्टं श्रुतं वा ॥ ७४ ॥

आपद्गतं हससि किं द्रविणान्धमूढ़ः
लक्ष्मीःस्थिरा न भवतीति किमत्र चित्रम् ।
एतान्प्रपश्यसि घटान् जल यंत्र चक्रे
रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः ।७५।

देशाटनं पण्डित मित्रता च
वारांगना राज सभा प्रवेशः ।
अनेक शास्त्राणि विलोकितानि
चातुर्य मूलानि भवन्ति पंच ॥ ७६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥७७॥

हरिः करी वृश्चिक वेणुरंभा
विनाश काले फलमुद्वहन्ति ।
यथा तथा सज्जन दुर्जनानाम्
विनाश काले विपरीत बुद्धिः ॥ ७८ ॥

विप्रास्मिन्नगरे महान्कथयतां तालद्रुमाणांगणः
को दाता रजको ददाति वसनं प्रातर्गृहीत्वा निशि ।
को दक्षः परदार वित्त हरणे सर्वोऽपि दक्षो जनः
कस्मा ज्जीवसि हे सखे विषकृमि न्यायेन जीवाम्यहम् ।७९

संपीतेऽधर मधुनि स्तने गृहीते
संजाते गत वसने तथोरुः युग्मे ।
किं नीवीगतमबले रुणत्सि पाणिम्
विक्रीते करिणि किमंकुशे विवादः ॥८०॥

कान्तारे घनतिमिरे भुजंगमेभ्यो
नोभीता न च गणिता महापगापि ।
किं वाले वहसि भयं मदंग संगात्
विक्रीते करिणि किमंकुशे विवादः ॥८१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स राघवेन्द्रो हृतराजदारः
स वानरेन्द्रो हृतराजदारः ।
एवं तयोरध्वनि दैव योगात्
समान शील व्यसनेषु सख्यम् ॥ ८२ ॥

मृगाः मृगैः संगमनु व्रजन्ति
गावश्च गोभिस्तुरगास्तुरंगैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः
समान शील व्यसनेषु सख्यम् ॥ ८३ ॥

विप्र प्रसादात्कमला वरोऽहम्
विप्र प्रसादा द्धरणिधरोऽहम् ।
विप्र प्रसादा ज्जगति पतिश्च
विप्र प्रसादान्मम राम नाम ॥ ८४ ॥

दाराः पुत्राः धनं वा परिजन सहितो बन्धुवर्गः प्रियो वा
माता भ्राता पिता वा श्वसुर कुल जना भृत्य ऐश्वर्य वित्ते ।
विद्या रूपं विमल भवनं यौवनं यौवतं वा
सर्वं व्यर्थं मरण समये धर्म एकः सहाय ॥ ८५ ॥

नो चेद् गवां यदि पयः पृथिवी तलेऽस्मिन्
संवर्द्धनं नहि भवेत् विधि सन्ततीनाम् ॥
यो जायते विधिवशेन तु सोऽपि रूक्षो
निर्वीर्य शक्ति रहितोऽति कृशः कुरूपः ॥ ८६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भिक्षो मांस निसेवनं प्रकुरुषे किं तत्र मद्यं विना
मद्यं चापि तब प्रियं प्रियमहो वारांगना भिः सह ॥
वेश्याप्यर्थ रुचि कुतस्तवधनं द्यूतेन चौर्येण वा
द्यूतचौर्य परिग्रहोस्ति भवतो नष्टस्य कान्या गति ॥८७॥

राज योग्या नहि विप्रा भिक्षा योग्या पुनः पुन ॥
निमंत्रणोत्सवा विप्रा न बुद्धि बल जीविनः ॥ ८८ ॥

धन्यो धर्मः शमित ज्वलनो गर्जिता मेघ माला
चण्डं चण्डं बहति पवनः छेदिता जाल पाशाः ॥
सर्पोधातादथ मृगरिपु श्चमृतो वज्र पातात्
मन्दं मन्दं प्रचलति हरिणी साधु साधु विधाता ॥८९॥

गायन्ति देवा किल गीत कानि
धन्यास्तु ते भारत भूमि भागे ॥
स्वर्गा पवर्गा स्पद मार्ग भूते
भवन्ति भूयः पुरूषः सुर त्वात् ॥ ९० ॥

लक्ष्मी क्षमस्व वचनीयमिदम् मयोक्तम्
अन्धि भवन्ति पुरुषास्त दुपासनेन ॥
नोचेत्कथं कमल पत्र विशाल नेत्रो
नारायण स्वपिति पन्नग भोगतल्पे ॥ ९१ ॥

मन्ये लक्ष्मी त्वया सार्धं समुद्रात् धूलिरूत्थिता
पश्यन्तोऽपि न पश्यन्ति श्रीमान् धूलि लोचनाः ॥ ९२ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मन्यु प्रहरणा विप्रा न विप्रा शस्त्र योधिनः ॥
निहन्युर्मन्युना विप्रा वज्रपाणि रिवा सुरान् ॥ ९३ ॥

तिथि वारं च नक्षत्रं तत्ववेदा गुणत्रयम् ॥
काल त्रयं च मासाश्च ब्रह्म सूत्रं च पण्नवः ॥ ९४ ॥

विष्णोश्चागनं निशम्य सहसा कृत्वा फणीन्द्रं गुणी
कौपीनं परिधाय चर्म करिणः शंभो पुरः धावति ॥
दृष्ट्वा विष्णु रथंसकम्प हृदयः सर्पोऽपतत् भूतले
कृतिर्विष्खलिता ह्रिया नतमुखो नम्रोहरः पातु वः ॥९५॥

तन्वी चारु पयोधरा सुवदना श्यामा मनोहारिणी
नीता निष्करुणेन केन चिदहो देशान्तरा दागता ॥
उत्संगो चितया तया रहित या किं जीवनं प्रेक्षसे
भिक्षो ते दयितास्ति किं नहि नहि प्राणप्रिया तुम्बिका ९६

या पाणिग्रह लालिता सुसरला तन्वी सुवंशोद्भवाः
गौरी स्पर्श सुखावहा गुणवती नित्यं मनोहारिणी ॥
सा केनापि हृता तया विरहितो गन्तुं न शक्तोऽस्म्यहम्
रे भिक्षो तव कामिनी नहि नहि प्राणप्रिया यष्टिका ॥९७॥

यः सुन्दरस्त द्धनिता कुरूपा
या सुन्दरी सा पति रूप हिना ॥
यत्रो भयं तत्र दरिद्रता च
विधे र्विचित्राणि विचेष्टितानि ॥ ९८ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उच्चैरध्ययनं पुरातन कथा स्त्रीभिः सहा लापनम्
तासामर्भक लालनं पतिनुति तत्पाक मिथ्या स्तुति ॥
आदेशस्य करावलम्बन विधिः पाण्डित्य लेख क्रिया
होरा गारुड मंत्र तंत्रकविधि भिक्षोगुणा द्वादशः ॥ ९९ ॥

प्रातः क्षालित लोचना करतले चंचत्पवित्रां कुरा
तत्तत्स्थाननिवेशितोर्ध्व तिलकाश्चैलान्त वद्धाक्षता ॥
कोजातश्च मृतोऽथवा मृततिथि कस्यालये वर्तते
चेत्थं हर्ष शतैर्यता प्रतिदिनं धावन्त्य हो भिक्षुका ॥१००॥

सुजनो न याति विकृतिं परहित निरतो विनाश कालेऽपि
छिन्नोऽपि चन्दन तरुः सुरभयति मुख कुठारस्य ॥१०१॥

दैवं परं विनश्यति तनु रपि
न श्री निवेदिता सत्सु ॥
अव शिष्यते हिमांशो
सैव कला शिरसि या शंभो ॥ १०२ ॥

आयुर्विनश्यत्य यशो विवर्धते
भाग्यक्षयं यास्यति दुर्गतिं व्रजेत् ॥
स्वर्गाच्च्यवन्ते पितरः पुरातना
धर्म व्यतेतस्य नरस्य निश्चितम् ॥१०३॥

नवनीतं हृदयं ब्राह्मणस्य
वाचि क्षुरो विहित तीक्ष्ण धारम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदुभयमेतद् विपरीतम्
क्षत्रियस्य वाङ् नवनीतं हृदयं तीक्ष्णधारम् ।।१०४।।

ज्ञान वृद्धो द्वि जाति नाम
क्षत्रियाणां वलाधिकः
वैश्यानां धान्य धनवान्
शूद्राणा मेव जन्मतः ।। १०५ ।।

अन्धस्य पन्था वधिरस्य पन्था
स्त्रियः पन्था भारवाहस्य पन्था
राज्ञ पन्था ब्राह्मणेना समेत्य
समेत्यतु ब्राह्मणस्यैव पन्था ।। १०६ ।।

किं मिष्टं सुत वचनम्
मिष्ट तरं किं तदेव सुत वचनम् ।।
मिष्टान्मिष्ट तमं किम्
श्रुति परिपक्वं तदेव सुत वचनम् ।।१०७।।

मुक्ता फलैः किं मृग पक्षिणौ च
मिष्टान्नपानं किमु गर्दभानाम् ।।
अन्धस्य दीपो वधिरस्य गानम्
मूर्खस्य किं शास्त्र कथा प्रसंगः ।। १०८ ।।

अवधौ विधौ वधूमुखी फणीनां निवासे
स्वर्गे सुधा वसति वै विबुधा वदन्ति ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षारं क्षयं पतिमृतं विष स्वल्प वासो
कंठेऽमृतं वसति वै भगवज्जनानाम् ॥ १०९ ॥

काया हंस विना नदी जल विना दाता विना याचकाः
भ्राता स्नेह विना तरू फल विना दुग्धं विना धेनवः ॥
राजा मंत्रि विना क्रिया शुचि विना स्निग्धं विना भोजनम्
विप्रो वेद विना युति पति विना दीपक विना मंदिरम् ।११०।

किं तेन हेम गिरीणा रजताद्रिणा वा
यत्राश्रिताश्च तरवस्तरवस्त एव ॥
मन्यामहे मलयमेव यदाश्रयेण
कंकोल निम्ब कुटजा अपि चन्दनास्यु ॥१११॥

साम्यं हि सर्वत्र सतां दयाया
नीचोच्चताया गणना न तत्र ॥
किं नाम छाया प्रति संहरन्ति
पादाश्रिते नीचतमेऽपि वृक्षः ॥ ११२ ॥

अधिकार पदं प्राप्य — उपकारं न करोति यः
अकारस्यैव लोपः स्यात् ककारो द्वित्वतां गतः ॥११३॥

मथुराया विलोमेन विलोप्य मध्यमाक्षरम् ॥
यन्मुखे तत्पदं नास्ति तन्मुखे मध्यमाक्षरम् ॥११४॥

जामाता जठरं जाया जातवेदा जलाशया
पूरिता नैव पूर्यन्ते जकारा पंच दुर्भराः ॥११५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विराज राज पुत्रारि यन्नाम चतुरक्षरम्
पूर्वार्धं तव शत्रुणां परार्धं तव वेश्मनि ॥११६॥

गुणिनां गुणेषु सत्स्वपि—पिशुनजो दोषमादत्ते ॥
पुष्पे फले विरागी क्रमेलकः कंटकौघमिव ॥११७॥

घृत कुंभ सहस्राणि काष्ठभार शतानि च ॥
यावद् विप्राः न संतुष्टा तावद्देवो न मन्यते ॥११८॥

दंवाधीनं जगत्सर्वं मंत्राधीनं च देवता
ते मंत्रा ब्राह्मणाधीना तस्माद्ब्राह्मणदेवता ॥११९॥

अनभ्यासेन वेदानाम् आचारस्य च वर्जनात् ॥
आलस्यात् अन्न दोषाश्च मृत्युर्विप्रान् जिघांसति ॥१२०॥

यस्य प्रसाद कलया वधिरः शृणोति
पंगु प्रधावति जवेन च वक्ति मूकः ॥
अन्ध प्रपश्यति सुतं लभते च वन्ध्या
तं देवमेव वरदं शरणं गतोऽस्मि ॥१२१॥

दशरथ सुत कान्ता क्यूं ल्यायो थो निपूते
दशरथ सुत पुत्रं जंगलं जाय सूते
तव गृह वर नारी झासति गेह ऊते
कनक रचित लंका खोसलेई मार जूते ॥१२२॥

देहीति वचन द्वारा देहस्था पंच देवताः
सद्यो निर्गत्य गच्छन्ति धी श्री ह्री शान्ति कीर्तयः ।१२३।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गो स्त्री द्विजानां परि रक्षणार्थम्
विवाह काले सुरत प्रसंगे
प्राणात्यये सर्व धनाप हारे
पंचानृता न्याहुर पातकानि ॥१२४॥

वितर वारिद वारि दवातुरे
चिर पिपासित चातक पोतके ॥
विपरिते मरुति क्षणमन्यथा
कूच भवान् कपयः कचचातके ॥१२५॥

कति नाम मुता न लालिता
कति वा नेह वधूर भुंजिहि ॥
कनु ते कनु ता कवा वयम्
भव संग खलु पान्थ संगमः ॥१२६॥

विद्या वपुषा वाचा वस्त्रेण विभवेन च
एभिः पंच वकारैश्च नरः प्राप्नोति गौरवम् ॥१२७॥

ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥
तेषां वाक्योदके नैव शुध्यन्ति मलिनोजना ॥१२८॥

स्वयं पंचमुखः पुत्रौ गजानन षडाननौ ॥
दिगम्बर कथं जीवेदन्नपूर्णा न चेत् गृहे ॥१२९॥

आपाण्डुरा विगलिता न च मे विषादः
दन्तावलि विगलिता न च खिन्न चेतः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एणीदृशो युवतय पथिमां विलोक्य
वावेति भाषण परा खलु वज्रपातः ॥१३०॥

यः पूतनामारण लब्ध कीर्तिः
काकोदरो येन विनीत दर्पः
यशोदया लंकृत मूर्तिरव्यात्
पतिर्यदुनामथवा रघूणाम् ॥१३१॥

कृतान्तस्य दूती जरा कर्ण मूले
समागत्य वक्तीति लोका शृणुध्वम् ॥
पर स्त्री पर द्रव्य वाञ्छा त्यजध्वम्
भजध्वं रमानाथ पदार विन्दम् ॥१३२॥

यदा यदा यान्ति नराहि जान्हवीम्
रुदन्ति पापानि बदन्ति चाप्रियम् ॥
अरे कृतघ्नाः नितरां नराधमाः
स्वयं समुत्पाद्य निहन्तु मुद्यता ॥१३३॥

आः पाकन्न करोषि पापिनी कथम्
पापी त्वदीय पिता
रण्डे जल्पसि किं तवैव जननि
रण्डा त्वदीया स्वसा ॥

निर्गच्छं त्वरितं गृहाद् वहिरतः
नेदं त्वदीयं गृहम्
हा हा नाथ ममाद्य देही मरणम्
अन्यस्य भाग्योदयः ॥१३४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हत्वा नृपं पति मवेक्ष्य भुजंग दष्टम्
देशान्तरे विधिवशात् गणिकास्मि जाता
पुत्रं पतिं समधिगम्य चिन्तां विहाय
शोचामि गोप गृहिणी कथमप्यतक्रम ॥१३५॥

सन्यासिनो हि धनिनो गृहिणो दरिद्राः
वैश्याश्च पूजनरताः विकलाश्च विप्राः ॥
अध्यापकोहि यवनो द्विजवालकानाम्
शूद्राश्च मंत्र गुरवः कलये नमस्ते ॥१३६॥

तावद् गुणाः गुरुत्वं च यावन्नार्थयते परम् ॥
अर्थी चेत् पुरुषो जातः क्वगुणाः क्व च गौरवम् ॥१३७॥

तावत्सर्वोत्तमो जन्तुस्तावत्सर्व गुणालयः ॥
नमस्यः सर्व लोकानां यावन्नार्थ यते परम् ॥१३८॥

कष्टमेतन्महत्पापं निर्धनत्वं शरीरिणाम् ॥
न मानयति नो वक्ति न स्पृशत्य धनं जनः ॥१३९॥

धर्मेण राज्यं लभते मनुष्यः
स्वर्गं च धर्मेण नरः प्रयाति ॥
आयुश्च कीर्ति च तपश्च धर्म
धर्मेण मोक्षं लभते मनुष्यः ॥१४०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धर्मोऽत्र माता पितरौ नरस्य
धर्मः सखा चात्र परे च लोके ॥
त्राता च धर्मस्त्विह मोक्षदश्च
धर्माहते नास्ति तु किंचि देव ॥१४१॥

एका भार्या प्रकृति मुखरा चंचला सा द्वितीयाः
एको पुत्रो भुवन विजयी मन्मथो दुर्निवारः
शेष शय्या शयनमुदधौ वाहनं पन्नगारिः
स्मारं स्मारं स्वगृह चरितं दारु भूतो मुरारिः ॥१४२॥

एका भार्या समर रसीका निम्नगा च द्वितीयाः
पुत्रोऽप्येकः द्विरद वदनः षण्मुखश्च द्वितीयः
नन्दी भृंगी कपील वदनः वाहन पुंगवेशः
स्मारं स्मारं स्वगृह चरितं भस्मदेहो महेशः ॥१४३॥

नित्यं छेदस्तृणानां युवि नख लिखनं पादयोरल्प शौचः
दन्तानामल्प शौच वसन मलिनता रुक्षतामूर्द्ध जानाम्
द्वे संध्ये चापि निद्रा विवसन शयनम् ग्रास हासास्तु रेखः
स्वांगे पीठे च वाद्ये हरति धनपते केशवस्यापि लक्ष्मीः १४४

लक्ष्मीस्ते पंक जाक्षी निवसतु भवने भारती कंठ देशे
वर्धन्तां वन्धुवर्गाः प्रवल रिपु गणाः यान्तु पाताल मूले ॥
देशे देशे सुकीर्ति प्रसरतु भवतां पूर्ण कुन्देन्दु शुभ्राम्
जीवत्वं पुत्रपौत्रैः स्वजन परिवृतैः भोज्यतां राज्यलक्ष्मीः १४५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यावल्लीला तरंगैः वहति सुरनदी जान्हवी पुण्यतोया
यावच्चाकाश मार्गे तपति सुरवरो भास्करो लोकपालः ॥
यावद्वजेन्द्र नीलः स्फटिक मणि शिला विद्यते मेरुशृंगे
तावत्वं पुत्रपौत्रै स्वजन परिवृतैः भोज्यतां राज्यलक्ष्मीः १

चरीकर्तु भव्यं सदा ते रमेशो
गणेशो जरीहर्तु विघ्नं त्वदीयम् ॥
नरीनर्तु वाणी सदा ते मुखाब्जे
दरीदर्तु ते शत्रु वर्गान्महेशः ॥१४७

स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु
गोवाजि वृद्धि धनधान्य समृद्धि रस्तु ॥
ऐश्वर्यमस्तु कुशलीस्तु रिपुक्षयोस्तु
सन्तान वृद्धि सहिता हरिभक्तिरस्तु ॥१४८

आनन्द काले स्थिर राज्य लक्ष्मीः
शिव प्रसादा द्वहु वाक्यसिद्धिः ॥
वाचा कृतं शत्रु विनाशनं च
दकार शब्दन्तु दरिद्र नाशः ॥१४९

स्तनन्धयस्य स्तन एव जीविका
दत्तस्त्वया स स्वयमानेन मम ॥
मया च पीतो म्रियते यदि त्वया
किं वा ममागः स्वयमेव कथ्यताम् ॥१५०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मत्तः प्रमत्तः उन्मत्तः श्रान्त क्रुद्धो बुभुक्षितः
त्वरमाणश्च लुब्धश्च भीतः कामी चते दशः
दशधर्मं न जानन्ति ॥१५१॥

ईच्छा द्वेषो भयं मोहो क्षुन्तृट् निद्रा तथैव च ॥
विण्मूत्र वाधा चेतेतद चिकित्स्यं हि देहिनाम् ॥१५२॥

तोयं गन्ध तिला यवाक्षत कुशा आज्यं पराशर्करा
दध्ना चैव फलादि पत्र युगलं पूगीफलान्यासनम् ॥
ताम्बूलं पुट धूप दीपक शुभं यज्ञोपवितं मधु
एतत् वस्तु समन्वितं द्विजवरा श्राद्धं गयाया कुरु ॥१५३॥

जकारो जन्म विच्छेद पकारः पाप नाशकः ॥
तस्माज्जप इति प्रोक्तो जन्म पाप विनाशकः ॥१५४॥

द्रव्याणि भूमौ पशवश्च गोष्ठे
नारी गृह द्वारि जनाः श्मशाने ॥
देहश्चितायां परलोक मार्गे
धर्मानुगो गच्छति जीव एक ॥१५५॥

अहं चनद्या परिपार कर्ता
भवाम्बुधेस्त्वं परिपार कर्ता
इत्थं प्रकारेण त्वया मया च
एका व्यवस्था परिपालनीया ॥१५६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आयुस्ते नरवीर वर्द्धतु सदा हेमन्त रात्रिर्यथा
लोकानां प्रिय दर्शनो भवसदा हेमन्त सूर्यो यथा ॥
शत्रुणा मति दुःसहो भव सदा हेमन्त तोयं तथा
नाशं यान्तु तवारयोपि सततं हेमन्त पद्मं यथा ॥१५७॥

कस्येयं तरुणि प्रपा पथिक नः किं पीयते स्याम्पयः
धेनुनामथ माहिषं वधिर रे वार कथं मंगलः ॥
सोमो वाथ शनिश्चरोऽमृतमिदं तत्तेऽधरे दृश्यते
भो भो पान्थ विलास सुन्दर सखे यद्रोचते तत्पिवः ।१५८।

सत्संगेन लभेत भक्तिपदवीं श्री राधिका स्वामीनः
सत्संगेन वसेत्सदैव शुचिमान् वृन्दावने पावने ॥
सत्संगेन च नन्दनन्दन धिया श्रीमद् गुरूं स्वंभजन्
सत्संगेन च ताप पाप निचयं मर्त्यो जहाति ध्रुवम् ॥१५९॥

स्तनो मांस ग्रथी कनक कलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशांकेन तुलितम् ॥
स्रवन्मूत्रक्लिन्न करिवर कर स्पर्धि जघनम्
मुहूर्निन्द्य रूपं कविवर विशेषैर्गुरु कृतम ॥१६०॥

यच्चिंतितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति
प्रातर्भवामि वसुधाधिप चक्रवर्ति
सोऽहं व्रजामि विपिने जटिल तपस्वी ।१६१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रोशन्तः शिशवः सवारि सदनं पंकावृतं चांगणम्
शय्यादंशवती च रूक्षमशनं धूमेन पूर्णं गृहम् ॥
भार्या निष्ठुर भाषिणी प्रमुरपि क्रोधेन पूर्णं सदा
स्नानं शीतल वारिणाहि सततं धिक् धिक् गृहस्थाश्रमम् ।१६२

सौभाग्य पुष्टि वल शुक्र विवर्ध नानी
किं सन्तिनो भुवि वहुनि रसाय नानि ॥
कंदर्प वर्धिनी परन्तु सिताच्य युक्ता
दुग्धा हतेन मम कोऽपिमतः प्रयोगः ॥१६३॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः
ज्ञान लव दुर्विदग्धं ब्रह्मापि तं नरं न रंजयति ॥१६४॥

सुपात्र दानाच्च भवेत् धनाढ्यो
धन प्रभावेण करोति पुण्यम् ॥
पुण्य प्रभावात् सुरलोक वासी
पुनर्धनाढ्यः पुनरेव भोगी ॥१६५॥

दानेन भोगा सुलभा भवन्ति
दानेन वैराण्यपि यान्ति नाशम् ॥
दानेन भूतानि वशी भवन्ति
तस्माद्धि दान सततं प्रदेयम् ॥१६६॥

भिक्षुका नैव याचन्ते न दत्तं धनमर्थिनाम्
तद्धन नैव जानामि प्रातः कस्य भविष्यति ॥१६७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुदानात् प्राप्यते भोगा सुदानात् प्राप्यते यशः
सुदाना ज्जायते कीर्तिं सुदानात् प्राप्यते सुखम् ॥१६८॥

को दारेण विदारिता वसुमती पश्चाद् खरा रोहणम्
तत्पापिष्ठ कुलाल पाद दमने दण्डेन चक्रे भ्रमम् ॥
रज्वाछेदन ताडनं च दहनम् मेतद्धि शोध्यं ममा
ग्राम्य स्वीकर टंकणं बहुकृत तन्नोपि दुःखं महत् ॥१६९॥

श्रीविष्णो श्रवणे परिक्षिद् भवद् वैयासकिः कीर्तने
प्रह्लाद स्मरणे तदङ्घ्रि भजने लक्ष्मीः पृथुः पूजने ॥
अक्रूरस्त्वभिनन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुनः
सर्वस्वात्म निवेदने वलिरभूत् कृष्णाप्तिरेषांफलम् ॥१७०॥

एष ब्रह्माति वृद्धस्तपति दिनपतिश्चंचलो मातरिश्वा
दिग्वासा नीलकंठस्त्रिदशपतिरसौ गर्वित क्षीयतेऽब्जः ॥
इत्थांदेव्या विचिन्त्य भ्रमरकुलकला गीत शब्द प्रफुल्ला
दत्ता माला मुरारे सुरतरुकुसुमालंकृता पातु युष्मान् ।१७१।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुभाषित ३ भाग

हरिं कोटिकन्दर्पलीलाभिरामम्
स्फुरत्कौस्तुभं श्यामलं पीतवस्त्रम् ॥
व्रजेशं तु बंशीधरं राधिकेशम्
परं सुन्दरं तं निकुंजे नमामि ॥ १ ॥

मज्जन्मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीय मदनुग्रह एष एव ॥
त्वद्भृत्यभृत्य परिचारक भृत्यभृत्य
भृत्यस्यभृत्य इति मां स्मर लोकनाथ ॥ २ ॥

श्री माधवं व्रजपतिं नवमेघगात्रम्
राधापतिं सुरपतिं मुरलीधरं च ॥
भक्तार्त्तिहं च परमार्थमनन्तदेवम्
कृष्णं नमामि शिरसा मनसा च भक्त्या ॥ ३ ॥

वित्तं देहि गुणान्वितेषु मतिमन्नान्यत्र देहे क्वचिन्
प्राप्तं वारिनिधेजलं घनमुखे माधुर्य युक्तं सदा ॥
जीवान्स्थावरजगमांश्च सकलान्संजीव्य भूमण्डलम्
भूयः पश्यति देव कोटि गुणित गच्छेत्तमम्भोनिधिम् ।४।

श्यामां विचित्रां शुक रत्न भूषणाम्
पद्मासनां तुंग पयोधरान्ताम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इन्दीवरे द्वे नवशालिमंजरीम्
शुकं दधानां वसुधां यजामहे ॥ ५ ॥

ओंकारमध्यनिलयां कमलायताक्षीम्
पंचाननां बहुभिधाऽऽयुधचापहस्ताम् ॥
तत्वार्थ वर्णमय विग्रह भासमानाम्
ध्यायामि तां निगम मातरमादि शक्तिम् ॥ ६ ॥

विनायकेशोऽब्धि भवांकितः कम्बुः
जीवस्तुतः भूति विभूषितांगः
संघश्च ब्रह्मन् भवदीय एष
प्रयातु साम्यं हरिणा हरेण ॥ ७ ॥

स्थानं नैव विचित्ररत्नरचितं वासांसि शुभ्राणि नः
नान्नं षड्रस संयुतं ममगृहे तोयं न शीतं तथा ॥
वित्तं नास्ति ममांगणे द्विजपते सैवाकृता नोचिता
कन्याविन्द गुरोररिष्ट सदनात् सद्यः प्रसन्नो भव ॥ ८ ॥

आघ्रातं परिचुम्बितं ननु मुहुर्लीढं पुनश्चर्वितम्
त्यक्तुं वा भूवि नीरसेन मनसातत्र वृथा माकृथा
हे सद्रत्न तवैतदेव कुशलं यद्वानरेण ग्रहा
दन्तासार विलोकन व्यसनिना चूर्णीकृतं नाश्मना ॥९॥

तिथि वारं च नक्षत्रं तत्ववेदा गुणत्रयम्
कालत्रयं च मासाश्च ब्रह्मसूत्रं च षण्नव ॥ १० ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गन्धं सुवर्णे फलमिक्षुदण्डे
नाकारि पुष्पं खलु चन्दनस्य
विद्वान् धनाढ्यो नतु दीर्घ जीवी
धातुः पुरा कोऽपि न बुद्धिदोऽभूत् ॥ ११ ॥

उषसि मागध मंगल गायकैः
झटिति जागृहि जागृहि जागृहि ।
अतिकृपार्द्रकटाक्षनिरिक्षणैः
जगदिदं जगदम्ब सुखी कुरु ॥ १२ ॥

आनन्द काले स्थिर राजलक्ष्मीः
शिव प्रसादात् बहु वाक्य सिद्धिः
वाचाकृतं शत्रु विनाशनं च
दकार शब्दन्तु दरिद्र नाशः ॥ १३ ॥

अकारणाविष्कृत वैर दारुणात्
असज्जनत् कस्य भयं न जायते
विष महाहेरिव यस्य दुर्वचः
सुदुःसह सन्निहितं सदा मुखे ॥ १४ ॥

द्रव्याणि भूमौ पशवश्च गोष्ठे
नारी गृहद्वारि जनाः श्मशाने
देहश्चितायां परलोक मार्गे
धर्मानुगो गच्छति जीव एक ॥ १५ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मित्राणां प्रिय वर्द्धनो भव सदा नैदाघ नीरं यथा
शत्रूणां भयवर्द्धनो भवभृशं नैदाघ नीरं यथा
आयुस्ते परिवर्द्धतां प्रतिदिनं नैदाघ घस्रो यथा
प्रत्यूहं क्षयमेतु नित्य मपिते नैदाघ रात्रिर्यथा ॥ १६ ॥

तृष्णार्त्तोऽलिः कुसुमजरसं चातको वारि वाहम्
तारानाथं स्मरति च यथा शुष्क कण्ठश्चकोरः ॥
कान्तः पान्थस्तरुवरमथो दुःस्थ साहित्य सेवी
श्रीमन्तं त्वां स्मरति सततं पूर्ण चन्द्रस्तथैव ॥ १७ ॥

दीर्घाक्षी दीप्तदन्ता दनुज दलदला देवता दुःखदात्री
दीव्यास्त्रैर्दिव्य कान्तिर्दरदवदमना दीप्तदेहा दुकूलैः ॥
द्वप्नानां दर्पदान्त्यै दशदिशि दशकं द्वप्न दोषां दधाना
देवी दुर्गा दुरन्तं दलयतु दुरितं दुर्गतिद्रावदक्षा ॥ १८ ॥

सजल जलद कालं प्रेम वापी मरालम्
अभिनव वलमालं क्षेमवल्ली प्रवालम् ॥
भुवन नलिन नालं दानवानां करालम्
निखिल मनुज पालं नौमितं नन्दवालम् ॥ १९ ॥

यो लंकेश गुरुः कुमार जनको योऽसौ गवीशध्वजो
यो गंगां धरति स्वयं हिमकरो दीप्तांग कान्तिःसदा ॥
यो नित्यं खलु भू विशेष सदनो वामांग संगस्तथा
भक्त्योमाधवमादिहीनमनिशं त श्रेयसे संश्रये ॥ २० ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षीरसारमपहृत्य शंकया
स्वीकृतं यदि पलायनं त्वया ॥
मानसे मम घनान्धतामसे
नन्दनन्दन कथं न लीयसे ॥ २१ ॥

मूलं भुजंगैः शिखरं प्लवंगैः
शाखा विहंगैः कुसुमं च भृंगैः
श्रितं सदा चन्दन पादपस्य
परोपकाराय सतां विभूतिः ॥ २२ ॥

वैद्यं व्याधिविषाकुलो धनपतिं दारिद्र्यदुष्टो जनः
खाद्यं च क्षुधितो हिमाम्बु तृषितश्छाया तरुं तापितः ॥
शोकार्तः स्वजनं वियोग विधुरो वत्सो यथा मातरम्
तद्वत् तत् सततं स्मरामि परमं ब्रह्माभिधेयं महः ॥ २३ ॥

यावदेव कमला कृपान्विता
तावदेव भवनं वधूः सुखम् ॥
पौरुषान्विततनुर्जनादरो
नास्ति चेत् प्रथम बणे वर्जितम् ॥२४॥

भो ब्रह्मन् भवता समं न घटते संग्राम वार्ताऽपि नः
सर्वे हीन बला वयं बलवतां यूयं स्थिता मूर्द्धनि ॥
यस्मादेक गुणं शरासनमिदं राजन्यकानां बलम्
युष्माकं द्विज जन्मनां नवगुणं यज्ञोपवीतं बलम् ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यस्या जन्मान्य वंशे वसति रपि सदा दूरदेशे पुरासीत्
सैषा भूत्वा वधूटी प्रकटित विनया वेश्म मध्यं प्रविश्य ॥
आजन्म प्राण तुल्यान् गुरुजन जननी सोदरानन्तरंगान्
दूरीकृत्य स्वगेहात् पतिमनुरमते धिग् गृहस्थाश्रमं नः ।२६।

श्वसुरगृहनिवासः स्वर्गवासो धरायाम्
निवसति ननु कश्चिद् वासरान् पंचपंचेत ॥
तदधिकमपि तिष्ठेद् दुग्धलुब्धो विडालः
तदधिक दिन वासे पादुकापूतपृष्ठः ॥ २७ ॥

उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं मम
श्रान्तस्तावदहं चिरं मरणजं सेवे त्वदीयं सुखम् ॥
इत्युक्तो धनवर्जितेन विदुषा सख्या श्मशाने शवो
दारिद्र्यान्मरणं वरं सुखमिति ज्ञात्वैव तूष्णीं स्थितः ॥२८॥

लक्ष्मीनाथं वहति गरुडस्तस्य भोक्ष्यो भुजंगः
उक्षावोढा धनपतिसखं सोऽपि वासं जवास
हंसो भुंक्ते विस किसलयं ब्रह्मणो वाहकोऽपि
सेवाभिर्न क्षपति महतां कर्मणो दुर्विपाकः ॥२९॥

गत प्राया रात्रिः कृशतनु शशी शीर्यत इव
प्रदीपोऽयं निद्रामुपगतो घूर्णित इव ॥
प्रणामान्ते मानं तदपि जहासि क्रुध महो
स्तन प्रत्या सत्या हृदय मपिते चण्डि कठिनम् ॥३०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वामे यस्य सरस्वती भगवती लक्ष्मीः सदा दक्षिणे
पाणौ यस्य गदा सुशंख रचना नागेन्द्र चूडामणिः ॥
बद्धोयेन महार्णवे भुजवले लंकापति निर्जितः
वन्दे विष्णु सहस्रनाम सहितो नारायणः पातुवः ॥३१॥

स्वस्ति स्वागतमर्घ्यं वदविभो किं दीयतां मेदिनी
का मात्रा मम विक्रम त्रयपदं दत्तं जलं दीयताम् ॥
मा देहीत्युशना ब्रवीद्धरिरयं पात्रं किमस्मात्परम्
चेत्येवं वलिनार्चितो मखमुखे पायात्सः श्री वामनः ।३२।

भस्माच्छन्न तनुः कदर्यं शयनात् शूली कदन्नाशनात्
तैला भाववशाज्जडाः शिरसि मे केशा जटात्वं गता
गौरेकः सचनैव लांगलवहो भार्या गृहे चण्डिका
प्राप्यस्त्वत्त इहार्द्ध चन्द्रमधुना प्राप्तं पदं शांभवम् ॥३३॥

याजमानो मनोवृत्तिः प्रीणने यस्य नो जनिः
तेन भूर्तारवत्येषा समुद्रागद्रुमैर्नहि ॥
क्रीता द्रव्येण या नारी सा न पत्नी विधीयते
सा न दैवे न सा पित्र्ये दासी तां कश्यपोऽब्रवीत् ॥३४॥

विद्वानेकं दश कविर्लभते नटः शतम् ॥
दम्भी सहस्रं हर्षेण लक्षं वेश्या न वैदिकः ॥३५॥

कक्षे किं मम पुस्तकं किमुदकम् काव्येषु सारोदकम्
गन्धः किं ननु रामरावणवधात् संग्राम गन्धो गुरुः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जीवः किं ममगौड मंत्र लिखितात् संजीवनं पुस्तकम्
पुच्छं किं खलु ताल पत्र लिखितं हा हा गुणाढ्यो महान् ।३६।

वार्द्धके तु मृता भार्या पुत्रहस्ते गतं धनम्
भोजनं च वधू हस्ते मृत्युरेव न संशयः ॥३७॥

पूर्णोऽहमर्थैरिति मा प्रसीद
रिक्तोऽहमर्थैरिति मा विषीद ॥
रिक्तं च पूर्णं भरितं च रिक्तम्
करिष्यतो नास्ति विधेर्विलम्बः ॥ १ ॥

राष्ट्रस्य चित्तं कृपणस्य वित्तम्
मनोरथं दुर्जन मानसानाम् ॥
स्त्रियश्चरित्रं पुरुषस्य भाग्यम्
देवो न जानाति कुतो मनुष्यः ॥ २ ॥

यद्धात्रा निज भाल पट्ट लिखितं स्तोकं महद्वाधनम्
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ॥
तद्धीरो भव वित्तमत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयो निधावपि घटो गृह्णाति तुल्यम् जलम् ॥३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वावम्भसि प्रवेष्टव्यौ गले बध्वा दृढां शिलाम्
विद्वांसं चाप्रवक्तारं धनवन्तमदायिनम् ॥ ४ ॥

नैवाकृतिः फलति नैव कुलं न शीलम्
विद्यापि नैव न च यत्न कृतापि सेवा ॥
भाग्यानि पूर्वतपसा खलु संचितानि.
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥५॥

सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यम्
हरिहर कथेव दुरितं गुणशतमऽप्यऽर्थिता हरति ॥६॥

वेपथुर्मलिनं वस्त्रं - दीनावाग् गद् गदः स्वरः
मरणे यानि चिन्हानि - तानि चिन्हानि याचने ॥७॥

वदनाच्चवहिर्याति प्राणा याञ्चाक्षरैः सह
ददामी त्यक्षरैर्दातुः पुनः कर्णाद् विशन्ति हि ॥८॥

देहीति वचनं श्रुत्वा हृदिस्थाः पंचदेवताः
मुखान्निर्गत्य गच्छन्ति-श्रीः ह्रीः धीः शान्ति कीर्तयः ॥९॥

वधिरयति कर्ण विवरं वाचं मूकयति नयनमन्धयति
विकृतयति गात्र यष्टिं संपद् रोगोयमद्भुतो राजन् ॥
टकाधर्म टकाकर्म टकाहि परमं धनम्
यस्य गेहे टका नास्ति - हा टका टक टकायते ॥१०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

असज्जनः सज्जन संगि संगात्
करोति दुःसाध्य मपीह साध्यम् ॥
पुष्पाश्रया शंभु शिरोऽधि रूढा
पिपीलिका चुम्बति चन्द्र बिम्बम् ॥११॥

दग्धं दग्धं पुनरपि पुनः कांचनं कान्तवर्णम्
घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारु गन्धम् ॥
छिन्नं छिन्नं पुनरपि पुनः स्वादुदं चेक्षु दण्डम्
प्राणान्तेऽपि प्रकृति विकृति जायते नोत्त मानाम् ॥१२॥

अजायुद्ध मृषि श्राद्धं प्रभाते मेघ डम्बरम्
स्त्रीभर्तुः कलहश्चैव चिरकालं नतिष्ठति ॥१३॥

गतव्यं यदि नाम निश्चित महो गन्तासि केयं त्वरा
द्वित्राण्येव पदानि तिष्ठतु भवान् पश्यामि यावन्मुखम् ॥
संसारे घटिका प्रवाह विगलद्धारा समे जीविते
को जानाति पुनस्त्वया सह ममस्याद् वानवा संगमः ।१४।

मागा इत्यपमंगलं व्रज इति स्नेहेन हीनं वचः
तिष्ठेति प्रभुता यथा रुचि कुरुष्वे त्यप्युदासीनता ॥
किं ते सांप्रतमाचराम उचितम् तस्योपचारं वधः
प्रस्थानोन्मनसीत्य भिष्ट मनुजे वक्तुं न शक्ता वयम् ॥१५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्र नास्ति दधि मन्थन घोषो
यत्र नो लघु लघूनि शिशूनि ॥
यत्र नास्ति गुरु गौरव पूजा
तानि किं वत गृहाणि वनानि ॥१६॥

आरोग्यमानृण्यमविप्रवासः
सद्भिर्मनुष्यैः सह संप्रयोगः ॥
स्व प्रत्यया वृत्ति रभीति वासः
षड्जीवलोकस्य सुखानि राजन् ॥१७॥

एह्यागच्छ समाश्रया सनमिदं कस्माच्चिराद् दृश्यते
का वार्तान्विति दुर्बलोऽसि कुशलं प्रीतोऽस्मि ते दर्शनात् ॥
एवं नीच जनेऽपि युज्यति गृहं प्राप्ते सतां सर्वदा
धर्मोऽयं गृहमेधिनां निगदितः स्मार्तैर्लघुः स्वर्गदः ॥१८॥

इन्द्रात् प्रभुत्वं ज्वलनात् प्रतापम्
क्रोधो यमाद्वै श्रवणाच्च वित्तम् ॥
पराक्रमं राम जनार्दनाभ्याम्
आदाय राज्ञः क्रियते शरीरम् ॥१९॥

श्रीकृष्णः पूतनायाः स्तनमलमपिवत् काल कूटेन पूर्णम्
प्रस्कन्नं भू प्रदेशे किमपि च पिबतो यत्तदा तस्य वक्त्रात् ॥
तस्मादेषा तमाखुः सुरवर परमोच्छिष्ट मेतद् दुरापम्
स्तुत्वा नत्वा मिलित्वा ह्यनिश मतिमुदा सेव्यते वैष्णवाग्रैः २०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बाल्ये सुतानां समरे भटानाम्-स्तुतौ कवीनां सुरते डगनानाम्
रिकार तुंकार गिरः प्रशस्ताः स्वभावतः प्रीतिकरा भवन्ति ।२१।

वाग्मी व्यास समः सवित् प्रियकथः प्रस्तावित् सत्यवाक्
सन्देहच्छिदनेक शास्त्र कुशलो नाऽऽख्याति विक्षेपकम् ॥
अव्यंगो जनरंजनो जित समो नाहं कृति धार्मिकः
संतोषी च चतुर्दशोत्तम गुणा वक्तुः प्रणीता इमे ॥२२॥

सद्वक्ता सदसि ब्रवीतु वचन यच्छृण्वतां चेतसः
प्रोल्लासं रस पूरणं श्रवणयोरक्ष्णो विकास श्रियम् ॥
क्षुन्निद्राश्रम दुःख कालगति हृत् कार्यान्तर विस्मृतिः
प्रोत्कंठामनिशं श्रुतौ वितनुते शोकं विरामादपि ॥२३॥

अष्टौ गुणाः पुरुषं दीपयन्ति
प्रज्ञा च कौल्यं च दमः श्रुतं च ॥
पराक्रमश्चा बहुभाषिता च
दानं यथा शक्ति कृतज्ञता च ॥२४॥

दायादाः स्पृहयन्ति तस्करगणा मुष्णन्ति भूमीभुजो
गृह्णन्तिच्छलमाकलप्य हुतभुग् भस्मी करोति क्षणात् ॥
अम्भः प्लावयति क्षितौ विनिहतं पक्षाहरन्ते हठात्
दुर्वृत्तास्तनया नयन्ति निधनं धिग् बह्वधीनं धनम् ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कंथा खण्डमिदं प्रयच्छ यदि वा स्वांके गृहाणार्भकम्
रिक्तं भूतलमत्र नाथ भवतः पृष्ठे पलालोच्चयः ॥
दम्पत्यो रिति जल्पतोर्निशि यदा चोरः प्रविष्टस्तदा
लब्धं कर्पट मन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ॥२६॥

न देवे देवत्वं कपट पटवस्तापस जना
जनो मिथ्यावादी विरलतर वृष्टि र्जलधरः ॥
प्रसंगो नीचानामवनि पतयो दुष्ट मनसो
जना युष्टा नष्टा अहह कलिकाला प्रभवति ॥२७॥

स्नानं नाम मनःप्रसाद जननं दुःस्वप्न विध्वंसनम्
शौचस्यायतनं मलापहरणं संवर्धनं तेजसः ॥
रूपोद्योतकरंगद प्रशमनं कामाग्नि संदीपनम्
नारीणां च मनोहरं श्रमहरं स्नाने दशैते गुणाः ॥२८॥

वैरूप्यं व्याधिपिण्डं स्वजन परिभवः कार्यकालाति पातो
विद्वेषो ज्ञाननाशः स्मृति मतिहरण विप्रयोगश्च सद्भिः ॥
पारुष्यं नीचसेवा कुलवल विलयो धर्मकामार्थ हानिः
कष्टं वै षोडशते निरुप चयकरा मद्यपानस्य दोषाः ॥२९॥

हंसो विभाति नलिनी दल पुंजमध्ये
सिंहो विभाति गिरि गह्वर कन्दरासु
जात्यो विभाति तुरगो रणभूमि मध्ये
विद्वान् विभाति पुरुषेषु विचक्षणेषु ॥३०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हंसो न भाति वलि भोजन वृन्दमध्ये
गोमायु मण्डलगतो न विभाति सिंहः ॥
जात्यो न भाति तुरगः खरयूथ मध्ये
विद्वान् न भाति पुरुषेषु निरक्षरेषु ॥३१॥

तन्नेत्रैस्त्रिभिरीक्षते न गिरिशो नो पद्म जन्माष्टभिः
स्कन्दो द्वादशभिर्न वा न मघवा चक्षुः सहस्रेण च ॥
संभूयापि जगत् त्रपस्य नयनैस्तद् वस्तुनो वीक्ष्यते
प्रत्याहृत सुदृशः समाहितधियः पश्यन्ति यत् पंडिताः ॥३२॥

बुद्धो फलं तत्व विचारणं च
देहस्य सारं व्रत धारणं च
अर्थस्य सारं किल पात्र दानम्
वाचः फलं प्रीति करं नराणाम् ॥३३॥

वचोऽमृतं यस्य मुखार विन्दे
दानामृतं यस्य करार विन्दे ॥
कृपामृतं यस्य मनोऽर विन्दे
न वल्लभः कस्य नरो वरोऽसौ ॥३४॥

चिन्ते दुर्वलतास्ति किं तव सखीयत् सार्ध मेवेक्षते
नैवं किन्तु ममास्ति विश्व विजयी दुःखाभिधो नन्दनः ॥
तस्यैषा रमणीति वल्लभतरा जाता मदीया स्नुषा
श्वश्रुःभक्ति परायणा न्वहमतो नो याति दूरं क्वचित् ।३५।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क जपः क तपः क सुखं क शमः
क यमः क दमः क समाधि विधिः ॥
क धनं क वनं क वलं क गुणो
वत ! शोक वशस्य नरस्य भवेत् ॥३६॥

नधृतिर्न मतिर्न गतिर्न रतिः
न यतिर्न नतिर्न नुतिर्न रुचिः ॥
पुरुषस्य गतस्य हि शोकवशम्
व्ययमेति सुखं शकलं सहसा ॥३७॥

आचार्य पुस्तक निवास सहाय वल्मा (भोजन)
वाह्यास्तु पंच पठनं परिवर्धयन्ति ॥
आरोग्य बुद्धि विनयोद्यम शास्त्र रागाः
आभ्यन्तरा पठन सिद्धि करा भवन्ति ॥३८॥

ददति तावदमी विषयाः सुखम्-स्फुरति यावदियं हृदि मूढता
मनसि तत्व विदांतु विवेचके-क विषयाः क सुखं क परिग्रहः ३९

वाचाला कलह प्रिया कुटिल धी क्रोधान्विता निर्दया
मूर्खा मर्म विभाषिणी च कृपणा माया युता लोभिनी ॥
भर्तृ क्रोध परा कलंक कलिता स्वात्वंभरी सर्वदा
दूरूपा गुरुदेव भक्ति विकला भार्या भवेत् पापतः ॥४०॥

वन्हिर्वारि वणिग् विषं विषधरो वैद्यश्च वैश्या वसुः
वक्री वानर वारणश्च विषयान्धो वैरिको वंचकः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याघ्रोवै वसुधाधिपश्च वनिता वाजीवृको वेसरो
विश्वास्या न कदाप्य हो बुध जनै रेते वकाराः किल ।४१।

मृच्चालिनी—महिष—हंस—शुक स्वभावा
मार्जार काक मशकाऽज जलौक तुल्याः ॥
सच्छिद्र कुंभ पशु सर्प शिलोपमानाः
ते श्रावका भुवि चतुर्दशधा भवन्ति ॥४२॥

वक्तु र्वस्तुरगर्विता श्रुतरुचिः चांचल्य हीनः पटुः
प्रश्नज्ञश्च बहुश्रुतोऽन्य नलसोऽनिद्रो जिताक्षः सुधीः ॥
दाता व्यक्त कथान्तरः कृतगुणप्रीतिर्न निन्दापरः
श्रोतुः पुंस इमे चतुर्दश गुणा विद्वज्जनै र्भाषिता ॥४३॥

जरा रूपं हरति धैर्यमाशा मृत्युः प्राणान् धर्मचर्या मसूया
क्रोधः श्रियं शीलमनार्यसेवा ह्रियं कामः सर्वमेवाभिमानः ।४४

सरलगतिः सरलमतिः सरलशयः सरलशील संपन्नः
सर्वं पश्यति सरलं सरलः सरलेन भावेन ॥४५॥

कुटिलगतिः कुटिलमतिः कुटिलाशयः कुटिलशील संपन्नः
सर्वं पश्यति कुटिलं कुटिलः कुटिलेन भावेन ॥४६॥

आलस्यं यदि न भवे ज्जगत्य नर्थः
कोन स्याद् वहुधनको बहु श्रुतो वा ॥
आलस्यादिय मवनिः स सागरान्ता
सम्पूर्णा नरापशुभिर्निर्धनैश्च ॥४७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धर्माज्जन्म कुले शरीर पटुता सौभाग्यमायुर्बलम्
धर्मेणैव भवन्ति निर्मल यशो विद्यार्थ संपत्तयः ॥
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते
धर्मः सम्यगुपासितो नर भवे स्वर्गा पवर्गप्रदः ॥४८॥

भर्ता यद्यपि नीति शास्त्र निपुणो विद्वान् कुलीनो युवा
दाताकर्णसमः प्रसिद्ध विभवः शृंगार दीक्षा गुरुः ॥
स्व प्राणाधिक कल्पिता स्व वनिता स्नेहेन संलालिता
तं कान्तं प्रविहाय सैव युवति जीरं पतिं वाञ्छति ॥४९॥

न यत्रधर्माचरणं न दानम्
व्रतं न यागो न च विष्णु चर्चा ॥
न पितृ गोविप्रवरामरार्चा
स्वल्पायुषस्तत्र जना भवन्ति ॥५०॥

भ्रातः कस्त्वं तु चायो गमनमिह कुतो वारिधेः पूर्वपाराद्
कस्यत्वं दण्डधारी किमु नहि विदितं श्री कलेरेव राज्ञः ॥
चातुवर्ण्यं विधात्रा विरचितममलं ब्रह्मणा धर्म हेतोः
एकीकर्तुं वलात् तन् निखिल जगति रे शासनादागतोऽस्मि ।

आसीत्सत्य युगे वलिस्तदनु च त्रेता युगे भार्गवो
रामः सत्य पराक्रमोऽथ भगवान् धर्मस्तथा द्वापरे ॥
दाता कोऽपि न चास्ति संप्रतिकलौ जीवन्ति केनार्थिनः
चेत्येवं कृत निश्चयेन विधिना व्यापारिणो निर्मिताः ।५२।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किंचित्रं यदि वेद पाठ निपुणो विप्रो भवेत् पण्डितः
किंचित्रं यदि राजनीति कुशलो राजा भवेत् धार्मिकः ॥
तच्चित्रं यदि रूप यौवनवती साध्वी भवेत् कामिनी
तच्चित्रं यदि निर्धनोऽपि पुरुषः पापं न कुर्यात् क्वचित् ।५३।

वाल्ये सुतानां सुरतेऽ गनानाम्
स्तुतौ कवीनां समरे भटानाम् ॥
त्वैकार युक्ता हि गिरः प्रशस्ताः ॥६४॥

लक्ष्मीं क्षीर समुद्र राज तनयां श्री रंगधामेश्वरीम्
दासी भूत समस्त देव वनितां लोकैक दीपांकुराम् ॥
श्रीमन् मन्द कटाक्ष लब्ध विभव ब्रह्मेन्द्र गंगाधराम्
तां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्द प्रियाम् ।५५।

नमाम्ययोध्यां सरयूं सरिद्वराम्
नमामि रामं रघुवंशभूषणम् ॥
अजाब्धि चन्द्रं नृपवर्य भूषणम्
नृपस्य सर्वाः महिषीर्नमाम्यम् ॥५६॥

नमामि रामं रघुवंश भूषणम्
नमामि सौमित्रिमतीव सुन्दरम् ॥
नमामि श्रीमद्भरतं दयानिधिम्
नमामि शत्रुघ्नमुदार दर्शनम् ॥५७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हरे मत्समः पातकी नास्ति भूमौ—
तथा त्वत्समो नास्ति पापापहारी
इति त्वंच मत्वा जगन्नाथ देव
यथेच्छा भवेत्ते तथा मां कुरु त्वम् ॥५८॥

नमामि सीतां रघुवंशजप्रियाम्
नमामि रामानुजवल्लभोर्मिलाम् ॥
नमाम्यहं भारत माण्डवीं शुभाम्
शत्रुघ्न पत्नीं श्रुतिकीर्तिं माश्रये ॥५९॥

नमाम्यहं मारूत सूनुमानिलम्
श्री जानकीजीवनजीवनं प्रियम् ॥
सौमित्रमित्रं कपिराजवल्लभम्
श्रीरामदूतं शिरसा नमामि ॥६०॥

यस्मात्सर्वमिदं प्रपंच रहितं माया जगज्जायते
यस्मिंस्तिष्ठति पाति चान्त समये कल्पानुकल्पे पुनः ॥
यं ध्यात्वा मुनयः प्रपंच रहितं विन्दंति मोक्षं ध्रुवम्
तं वन्दे पुरुषोत्तमाख्यममलं नित्यं विभुं निश्चलम् ॥६१॥

यं ध्यायन्ति बुधाः समाधि समये शुद्धं वियत्संनिभम्
नित्यानन्दमयं प्रसन्नममलं सर्वेश्वरं निर्गुणम् ॥
व्यक्ताव्यक्तपरं प्रपंचरहितं ध्यानैकगम्यं विभुम्
तं संसार विनाशहेतुमजरं वन्दे हरिं मुक्तिदम् ॥६२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नीलांभोजदलाभिरामनयनां नीलाम्बरालंकृताम्
गौरांगीं शरदिन्दु सुन्दर मुखीं विस्मेरबिंबाधराम् ॥
कारुण्यामृतवर्षिणीं हरिहरब्रह्मादिभिर्वन्दिताम्
ध्यायेत्सर्वजनेप्सितार्थफलदां रामप्रियां जानकीम् ॥६३॥

वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोः वाय्वादिकोणेषु च ॥
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥६४॥

सुमंगलं मंगलमीश्वरायते
सुमंगलं मंगलमच्युतायते ॥
सुमंगलं मंगलमन्तरात्मने
सुमंगलं मंगलमब्जनाभ ते ॥६५॥

श्री माधवं व्रजपतिं नवमेघगात्रम्
राधापतिं सुरपतिं मुरलीधरं च ॥
भक्तार्त्तिहं च परमार्थमनन्तदेवं
कृष्णं नमामि शिरसा मनसा च भक्त्या ॥६६॥

ओंकारमध्यनिलयां कमलायताक्षीम्
पंचाननां बहुभिधाऽऽयुधचापहस्ताम् ॥
तत्त्वार्थवर्णमयविग्रहभासमानाम्
ध्यायामि तां निगममातरमादिशक्तिम् ॥६७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनींसंनिभाम्
शंखं चक्रगदाऽभया विदधतीमिन्दोःकलां बिभ्रतीम् ॥
ग्रैवेयांगदहारकुण्डलधरामाखण्डलाद्यैः स्तुताम्
ध्यायेत् विंध्यनिवासिनी शशिनिभां पार्श्वस्थपंचाननाम् ।६८।

उषसि मागधमंगलगायकैः
झटिति जागृहि जागृहि जागृहि ॥
अतिकृपार्द्रकटाक्षनिरीक्षणैः
जगदिदं जगदम्ब सुखी कुरु ॥६९॥

श्रीकृष्ण गोपाल हरे मुकुन्द गोविन्द हे नन्दकिशोर कृष्ण
हा श्री यशोदा तनय प्रसीद श्रीवल्लवी जीवन राधिकेश ॥७०॥

मुखे ते ताम्बूलं नयन युगले कज्जल कला
ललाटे काश्मीरं विलसति गले मौक्तिक लता ॥
स्फुरत्कांची शाटी पृथुकटितटी हाटकमयी
भजामि त्वां गौरीं नगपतिकिशोरीमविरतम् ॥७१॥

सन्मित्रं सधनं स्वयोषितरतिश्चाज्ञापराः सेवकाः
सानन्दं सदनं सुताश्च सुधियः कान्ता मनोहारिणी ॥
आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधो संगमुपासते हि सततं धन्यो गृहस्थाश्रमः ॥७२॥

स्थाने सिंह समा रणे मृग समा देशान्तरे जम्बुका
आहारे खलु भीमसेन सदृशाः श्वानोपमा मैथुने ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रूपं मर्कट वत् पिशाच लिपटा क्रूरा खला निर्दया
स्वार्थ मार्थ पटु परार्थ कटुकं एतेगुणा वैश्यजा ॥७३॥

काली कराली च मनोजवाच सुलोहिता या च सुधूम्रवर्णा
स्फूर्लिंगिनी विश्वरूची च देवी लेलीयमाना इति सप्तजिह्वा ७४

१० १२ ५ १५ २५
इष्टं दशघ्नोऽर्क युतः शरघ्नः पाणेन्दु युक्तः शरपक्ष भक्तः ॥
लब्धं त्रिगुण्यं दलितं च सम्यक् समासु चौरं प्रवदन्तिगर्गः ।७५।

सिंहादुत्थाय खड्गं ददड दड दडा धावमाना भवानी
दैत्यानां त्रोटयन्ती ततड तड तडा त्रोटयन्ती शिरांसि ॥
हर्षाद् रक्तं पिवन्ती घुघुट घुट घुटा प्रेषयन्ती पिपासान्
पीत्वा पीत्वा हसन्ति खखल खल खला शांभवी मां पुनातु ७६

कल्याणी कमलासनस्थ रमणी मातस्तमोहारिणी
विश्वाह्लादन कारिणी भगवती लावण्य मुद्रावणी ॥
कारुण्यामृतवर्षिणी कलयतां कल्याण पारं परम्
सा दुर्गा नवकोटि मूति सहिता मां पातु विश्वेश्वरी ।७७।

नाथ त्वं भवसागरस्य दयया पार प्रदोऽहं तथा
लोकानां सरितः कुटुम्ब भरण व्याजेन संतारकः ॥
युक्तं नापित धावकादि वदतः कैवर्तयोनौर्मिथः
नार्थी दानमिमं जनं तव पुनः घट्टागतं तारय ॥७८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गीर्भिर्गुरूणां परुषाक्षराभिः
तिरस्कृता यान्ति नरा महत्वम् ॥
अलब्ध शाणोत्कषणा नृपाणाम्
न जातु मौली मणयो वसन्ति ॥७९॥

पावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षणो नायुषः ॥
आत्मश्रेयसि तावदेव विदुषाकार्यः प्रयत्नो महान्
प्रोद्दीप्ते भवनेतु कूप खननं प्रत्युद्यमः कीदृशः ॥८०॥

विश्वामित्र पराशर प्रभृतयो वाताम्बुपर्णाशनाः
तेऽपि स्त्रीमुखपंकजं सुललितं दृष्ट्वैव मोहंगता ॥
शाल्यन्नं सघृतं पयोदधियुतं भुंजन्ति ये मानवाः
तेषामिन्द्रिय निग्रहो यदि भवेत् विध्यस्तरेत् सागरम् ।८१।

ब्राह्मी चन्दन वालिका भगवती रानीमती द्रौपदी
कौशल्या च मृगावती च सुलसा सीता सुभद्रा शिवा
कुन्ती शीलवती नलस्य दयिता चूला प्रभावत्यहो
पद्मावत्यपि सुन्दरी दिनमुखे कुर्वन्तु नो मंगलम् ॥८२॥

सीदन्ति सन्तो विलसन्त्यसन्तः
पुत्रा म्रियन्ते जनकश्चिरायुः
परेषु मैत्री स्वजनेषु वैरम्
पश्यन्तु लोका कलि कौतुकानि ॥८३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उपनिषदः परिपीता
गीतापि च हन्तमतिपथं नीता
तदपि न हा विधु वदना
मानस सदनात् वहिर्याति ॥८४॥

बुभुक्षितैः व्याकरणं न भुज्यते
पिपासितैः काव्यरसो न पीयते
न छन्दसा केनचिदुद्धृतं कुलम्
हिरण्यमेवार्जय निष्फला कला ॥८५॥

या यात्रा शंकरस्य त्रिपुरविदहने खाण्डवे चार्जुनस्य
या यात्रा राघवस्य जलनिधितरणे सेतु बन्धे समुद्रे
या यात्रा वायु सूनो रोषधि गमने लक्ष्मणै शक्ति भिन्ने
सा यात्रा सौख्यदात्री मम भवतु सदा सर्व मांगल्ययुक्ता

श्री राधिकाया हृदयारविन्दे
पादारविन्दं न विराजतेहि
अथोष्ण दुग्धं प्रतिपान तो वा
बुच्छालकावा मम प्रोच्छलन्ति ॥

रवेः कवेः किं समरस्य सारम्
कृपेर्भयं किं किमदन्ति भृंगाः
केषां भयं चाभयमेव केषाम्
भागीरथी तीर समाश्रितानाम् ॥

अदृष्ट पूर्वा वहवः सहाया, सर्वे पदस्थस्य भवन्ति मित्राः ।
अर्थे विहीनस्य पदच्युतस्य, भवत्यकाले स्वजनोऽपि शत्रुः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुभाषित २ भाग

यज्ञोपवीतं यदि जीर्णवन्त विद्यादिवेद्यं पर ब्रह्म सत्वम् ॥
आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं विसृजस्तु तेजः ॥१॥

वित्तं देहि गुणान्वितेषु मतिमन्नान्यत्र देहे कचित्
प्राप्तं बारि निधेर्जलं घनमुखे माधुर्ययुक्तं सदा ॥
जीवान्स्थावर जंगमाश्च संकलान्संजीव्य भूमण्डलम्
भूयः पश्यति देवकोटि गुणितं गच्छेत्तमम्भोनिधिम् ॥२॥

का चिन्ता मम जीवने यदि हरिर्विश्वंभरो जीयते
नोचे दर्भक जीवनाय जननीस्तन्यं कथं निःसरेत् ॥
इत्यालोच्य मुहुर्मुहुर्यदुपते लक्ष्मीपते केवलम्
त्वत्पादांबुज सेवनेन सततं कालो मया नीयते ॥३॥

देयं भोज्य धनं धनं सुकृतिभि र्नोसंचयस्तस्यवै
श्रीकर्णस्य वलेश्च विक्रमपतेरद्यापिकीर्तिः स्थिता ॥
अस्माकं मधुदान भोग रहितं नष्टं चिरात्संचितम्
निर्वाणादिति नैज पाद युगलं घर्षन्त्यहो मक्षिकाः ॥४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पीतोऽगस्त्येन तातश्चरण तलहतो वल्लभोऽन्येन रोषात्
आवाल्याद्विप्रवर्यैः स्ववदन विवरे धार्यते वैरिणीमे ॥
गेहं मे छेदयन्ति प्रतिदिवस मुमाकान्त पूजा निमित्तम्
तस्मात्खिन्ना सदाऽहं द्विजकुलसदनं नाथनित्यं त्यजामि ।५।

रामाद्याचय मेदिनीं धनपतेर्वीजं वलाल्लांगलम्
प्रेतेशान्महिषं तवास्ति वृषभः फालं त्रिशूलं तव ॥
शक्ताहं तव चान्नदान करणे स्कन्दोऽस्ति गोरक्षणे
खिन्नाहं हर भिक्षया कुरु कृषिं गौरी वचः पातुवः ॥६॥

कस्त्वं नन्दसुतः किमत्र भवने गुप्तोऽस्मि मातुर्भयात्
तर्हि गोरसमात्मसात्प्रकुरुपे मार्जारकैः रक्षकः ॥
बाला किं ननु साक्षिणो दधिकथं वक्त्रेत्वया चार्पितः
इत्थं मंथनताडितोबत हसे मुग्धो हरिः पातुवः ॥७॥

विनायकेशोऽब्धिभवांकितः कभुः
जीवस्तुतः भूतिविभूषितांगः ॥
संघश्च ब्रह्मन् भवदीय एषः
प्रयातु साम्यं हरिणा हरेण ॥८॥

दत्ता न नागा तुरगा न तुंगा
नो दास दासी न च तुल्य वित्तम् ॥
कन्येयमस्माभि रुपासनार्थम्
आदाय वद्धांजलि संपुटैर्वः ॥९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वासार्थं सुखदायि वस्तु निवहे नालंकृतं सुन्दरम्
सद्मादायि च वारि पातु ममलं भोज्यं पयो निर्मितम् ॥
माधुर्यादि गुणैः सुगुम्फित गिरा भूदान् सुमानः कृतः
पर्याप्तं द्रविणं सुशील तनया दत्तेयतः किं परम् ॥१०॥

सम्मान जुष्टा मधुरान्न तुष्टा
दृष्टाहि विद्या कुल शील वृत्तैः
सम्बन्ध चित्ता गुणरज्जुभिर्यत्
तन्नाम वः कौशलमेव नूनम् ॥११॥

गवीश पत्रो न गजार्ति हारी
कुमार तातः शशि खण्ड मौलिः
लंकेश संपूजितपादपद्मः
पायादनादिः परमेश्वरोवः ॥१२॥

दत्तं नते कुंजर पुंजमच्छम्
कौशेय वस्त्रं मणिरत्न विभूषणं च ॥
एषामदीय तनुजा गृह कर्मदक्षा
दत्ता त्वदीय कुलवृक्षविवर्द्धनाय ॥१३॥

लोके यशः सुविमलं विततं समन्तात्
लक्ष्मीर्गृहे परिणता विपुला च कीर्तिः
रत्नत्रयं त्वधिगतं तव संगमेन
किं किं न साधयति सज्जन संगतिश्च ॥१४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रस्याम्बु समर्पणं किमुचितं यस्यांगणे स्वर्णदी
वासोऽलंकरणैर्भवेदुपचितिः किं यस्य कल्पद्रुमः ॥
अन्नाद्यैरपि तुष्टि रस्य किमहो यस्यास्ति गेहे सुधा
तस्मादत्र नतेः परं किमुचितम् वद्धवांजलिम् चाग्रतः ॥१५॥

किं वर्णयामो भवतां कुलोदधिम्
सुपावनं यस्य हि कीर्तिजं तटम् ॥
धन्यावयं पीत समादरा मृताः
नरोत्तमो लब्ध तवात्मजोऽपि च ॥१६॥

फुल्लामहे वयमिहाद्य भवत् सुसंगात्
सम्बन्धिनो हि कमलानि सर्वमयूखात् ॥
चन्द्राद्यथाहि कुमुदा जलदान् मयूराः
विष्णोपदाच्च सुजना सुबुद्धा सुवाण्या ॥१७॥

श्रीकृष्णः कुशलं करोतु भवताम् धाता प्रजानां सुतः
निर्विघ्नं गणनायकः प्रतिदिनं भानुः प्रतापो दयम् ॥
शंभुस्ते धनधान्य कीर्ति मतुलां दुर्गारिनाशं मुदा
गंगा ते खलु पापहा निशिदिनं लक्ष्मीःसदा तिष्ठतु ॥१८॥

यावद् गंगा हरिहर धरा व्योम सोपान मार्गे
यावद् गौरी दहन पवनौ सागरे यावदंभः ॥
यावद् ब्रह्मा पिनाकी हरि ननु कमला वेद सिद्धान्तवाणी
तावद् राज्यं भवतु भवतां निश्चला दीर्घमायुः ॥१९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यावद्वीची तरंगान्वहति सुरसरी जान्हवी पुण्य तोया
यावच्चाकाश मार्गे तपति दिनकरो भास्करो लोकपालः ॥
यावद्वज्रेन्द्र नील स्फटिक मणि शिला मेरु शृंगे जपन्ति
तावत्वं पुत्रपौत्रैः स्वजन परिवृतो जीव शंभोः प्रसादात् ।२०।

यत्राभ्यागत दानमान चरण प्रक्षालना न्नाशनम्
सत्सेवा पितृ देवतार्चन विधिः सत्यं गवां पालनम् ॥
धान्यानामपि संग्रहो न कलहश्चित्तानु रूपा प्रिया
तत्राहं निवसामि नित्यम चलेत्यूचे श्रिया श्रीपतिः ॥२१॥

आघातो भृगुणा कृतो निजपते पादेन विष्णोरुर
स्यंभोधिं किल कुंभ संभव मुनिस्तातं निजं पीतवान् ॥
अच्छिन्दन्ति निजं प्रियं शतथलं वासस्थलं ब्राह्मणा
इत्थं दुर्नयतो भवत्य करुणा पद्मालया तान् प्रति ॥२२॥

मूर्खाय द्रविणं ददासि कमले विद्वत्सु किं मत्सरो
नाहं मत्सरिणी बुधेषु न चमे मूर्खे रति र्विद्यते ॥
मूर्खेभ्यो द्रविणं ददामि यदहो तत्कारणं श्रूयताम्
विद्वान् सर्वगुणै र्विभूषित तनुमूर्खस्य नान्यागतिः ॥२३॥

काली कान्ता विषमनयना सर्वदा युद्ध शीला
पुत्रोऽप्येकः करिवर मुखो षण्मुखश्च द्वितीयः ॥
मृत्युः श्रेष्ठः कपिवर मुखो वाहनं वृद्ध उक्षा
स्मारं स्मारं स्वगृह चरितं मृन्मयो विश्वनाथः ।२४।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कृष्णेनाम्ब गतेन रन्तु मधुना मृद भक्षिता स्वेच्छया
सत्यं कृष्ण क एव माह मुषली मिथ्याऽम्ब पश्याऽननम् ॥
व्यादेहीति विकासितेऽथ वदने दृष्ट्वा समस्तं जगत्
मातायस्य जगाम विस्मयरसं पायात् सवः केशवः ॥२५॥

भाषन्ते वनिता कलौ प्रतिवचोऽप्रीतिप्रदं स्वामिनः
तासां यत् पतिदेवतेति वचनं षष्ठी समासा श्रयम् ॥
लज्जा धर्म भयं न तासु कविचित् कार्ये यथेच्छं रता
नासावद्ध गवोयमान् निज पतीन् कुर्वन्ति धन्यः कलिः ।२६।

दग्धं खाण्डव मर्जुनेन वलिना दिव्यैर्द्रुमैः सेवितम्
दग्धा वायु सुतेन रावणपुरी लंका पुनः स्वर्ण भूः ॥
दग्धं पंचशरः पिनाक पतिना तेनाप्य युक्तं कृतम्
दारिद्र्यं जनताप कारकमिदं केनापि दग्धं नहि ॥२७॥

किं पाद्यं पदपंकजे समुचितं यत्रोद्भवा जान्हवी
किं वाऽर्घ्यं मुनि पूजिते शिरसते भक्त्याहृतं साम्प्रतम् ॥
किं पुष्पं त्वयि शोभते व्रजपते सत्पारिजातार्चिते
किं स्तोत्रं गुणसागरे त्वयिपरे केनार्चयेत् त्वां नरः ॥२८॥

हे लक्ष्मी क्षणिके स्वभाव चपले मूढे च पापेऽधमे
नत्वं चोत्तम पात्र मिच्छसि खले प्रायेण दुश्चारिणी ॥
ये देवार्चन सत्य शौच निरता ये चापि धर्मे रताः
तेभ्यः कुप्यसि निर्दये गतमतिर्नीचोऽपि ते वल्लभः ॥२९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाहं दुश्चरिता न चापि चपला क्षुद्रो न मे रोचते
नो शूरो न च पण्डितो न च शठो हीनाक्षरो नैव च ॥
पूर्वस्मिन् कृत पुण्य योग विभवः प्राप्नोति ते सत्फलम्
लोकानाम सहिष्णुता सखि कथं दृष्ट्वा तदीयं सुखम् ॥३०॥

येषां श्रीमद् यशोदा सुतपद कमले नास्ति भक्तिर्नराणाम्
येषामाभीर कन्या प्रिय गुण कथने नानुरक्तारसज्ञा ॥
येषां श्रीकृष्ण लीला ललित निशमने सादरौ नैव कर्णौ
धिक् धिक् धिक् तान् धिगेतान् कथयति नियतं कीर्तनस्थो मृदंगः

किं ब्रूमस्त्वां यशोदे कति कति सुकृत क्षेत्र वृन्दानि पूर्वम्
गत्वा कीदृग्विधानैः कति कति सुकृता न्यर्जितानि त्वयैव ॥
नो शक्रो नः स्वयंभूर्न च मदनरिपुर्यस्य लेभे प्रसादम्
तत्पूर्ण ब्रह्म भूमौ विलुठति विलपन् क्रोड़ मारोढु कामः ।३२।

माता यस्य धरा धरेन्दु दुहिता तातो महेशस्तथा
भ्राता विघ्न कुलान्तकः पितृ सखो देवो धनानां पतिः ॥
ख्यातः क्रौंच विदारणे सुरपतेः सेना गुणीः षण्मुखः
तद्दुर्दैव वलेन किं न घटते कुत्रापि पाणिग्रहः ॥३३॥

अंगुल्या कः कपाटे प्रहरति कुटिलो माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणीधरः किं फणीन्द्रो द्विजिह्वः
मुग्धे घोराहिमर्दी किमुत खगपतिर्नो हरिः किं कपीन्द्रः
श्रुत्वेदं सत्यभामा प्रति वचन जितः पातुवश्चक्रपाणिः ॥३४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ताम्बूलं गदराशि नाश निपुणं दुर्गन्ध विध्वंसनम्
रुच्यं जाठर वन्हि बुद्धि जतनं सुस्वप्न संवर्द्धनम् ॥
आस्यालं करणं विनोद सदनं संवर्द्धना सूचनम्
रागेणैव विभातु तस्य नियतं श्रीपूर्ण चन्द्राननम् ॥३५॥

पित्रो र्नैव वचः शृणोति दिवसेऽतीते व्रजत्यालयम्
विद्याभ्यास पराङ्मुखस्य नियतं दुर्बुद्धिमालम्बते ॥
बन्धूनामुपदेश वाचि वदति क्रोधैव तानं वचः ॥
साधून् निन्दति दुर्जनं च मनुते मित्रं कुपुत्रोभुवि ॥३६॥

आहारे वडवानलश्च शयने यः कुम्भकर्णायते
सन्देशे बधिरः पलायन विधौ सिंहः शृगालो रणे
अन्धो वस्तु निरीक्षणेऽथ गमने खंजः पटुः क्रन्दने
भाग्येनैव हिलभ्यते प्रभु जनै रेवं विधः सेवकः ॥३७॥

आह्वानेषु गृहीत मौन नियमः स्तेयव्रते दीक्षितः
पंगुः पर्यटने निरन्तरमृषा जल्पेषु पंचाननः ॥
निद्रायां खलु कुम्भकर्ण विजयो हस्ती तथा भोजने
कोलः शौच विधावयं सुकृतिनां भाग्येन भृत्यो भवेत् ३८

तावद् विद्याऽनवद्या गुणगणमहिमा शौर्य गांभीर्य वीर्यम्
गेहे स्वे सर्वशान्तिः परगुण कथने वाक् पटुत्वं प्रभूतम् ॥
यावत् पाकाकुलाभिः स्वगृह युवतिभिः प्रेषिता पत्य वक्रात्
वा वा वा नास्ति तैलं नच लवणमपीत्यादि वाचाम् श्रुतिर्न ३९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शीतं शातयति श्रुतं शमयति प्रज्ञां निहन्ति क्रमात्
दैन्यं दीपयति क्षमां ज्ञपयति व्रीडां निरस्यत्यपि ॥
तेजो जर्जरयत्यपास्यति मतिं विस्तारयत्यर्थिताम्
दारिद्र्यं पुरुषस्य किंन कुरुते वैरं परं भीषणम् ॥४०॥

विद्या सत्कविता तथा सुजनता सेवापि च प्रार्थना
पंचैताः परिणिन्यिरे जनयितुं वित्तात्मजं यत्नतः ॥
व्यापारं सकलं विहाय सततं तास्वेव रक्तं मया
दुर्दैवेन दुरात्मना नरपतेः पंचैव वन्ध्याः स्त्रियः ॥४१॥

क्षेदः चम्पक चूत चन्दन वने रक्षा करीर द्रुमे
हिंसा हंस मयूर कोकिल कुले काकेषु वह्वादरः ॥
मातंगेन खरक्रयः सुसमता कर्पूर कार्पासयोः
एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः ॥४२॥

मानुष्ये सति दुर्लभा पुरुषता पुंस्त्वे पुनर्विप्रता
विप्रत्वे वहु विद्यता नययुता विद्यावतोऽर्थज्ञता ॥
अर्थज्ञस्य विचित्र वाक्य पटुता तत्रापि लोकज्ञता
लोकज्ञस्य समस्त शास्त्र विदुषो धर्मेमतिर्दुर्लभा ॥४३॥

दंभं नोद्वहते न निन्दति परान् नो भाषते निष्ठुरम्
प्रोक्तं केनचिदप्रियं च सहते क्रोधं च नालभ्यते ॥
ज्ञात्वा शास्त्रमपि प्रभूतमनिशं संतिष्ठते मूकवद्
दोषां छादयते गुणान् वितनुते चाष्टौगुणाः पण्डिते ।४४।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गात्रं संकुचितं गतिर्विगलिता दन्ता समुन्मूलिता
दृष्टिर्नश्यति रूपमेव चलितं वक्त्रं च लालाकुलम् ॥
आलापं न करोति वान्धवजनः पत्नी न शुश्रूयते
हा कष्टं स्थविरः पिताऽपि बहुभिः पुत्रैरवज्ञायते ४५

ज्ञानं वर्द्धयति श्रियं वितनुते वैदग्ध्यमामुंचति
श्रेयः पल्लवयत्यघानि दलयत्युन्मीलयत्युन्नतिम् ॥
बुद्धिं संपरि शोधयत्युपचिनोत्युच्चैः कला कौशलम्
किं किं नारभते हरेरिव कथाश्चर्यां सतां संगतिः ।४६।

कस्त्वं खर्व द्विजोऽहं कुत इह नृपतेर्दक्षिणार्थी मखेऽस्मिन्
स्वर्णं गां वा गृहाण त्रिपद परिमितां भूमिमभ्यर्थयेऽहम् ॥
तुभ्यं दत्तेति यावद् वदति वलिरसौ तावदेव त्रिपादैः
त्रैलोक्याक्रान्तमूर्तिः प्रहसितवदनो वामनःपातुयुष्मान् ४७

भिक्षुः कासि वलेर्मखे पशुपतिः किं नास्त्यसौ गोकुले
मुग्धे पन्नगभूषणः सखि सदा शेते सः शेषोपरि ॥
दुर्गे मुंच विषादमाशु कमले नाहं प्रकृत्याचला
चेत्थं श्रीगिरिजा समुद्रसुतयो वाक्चातुरी पातुवः ॥४८॥

कस्त्वं भो रजनीमुखे पशुपतिः किं मे हरिर्वाहनम्
देवोमापतिरन्ननास्ति कमला शूली न वैद्यालयः ॥
भीमोऽहं गिरिराज पुत्रि चपले न द्रौपदी मन्दिरम्
इत्थं तत्परिहास केलि कलया मुग्धो हरः पातु वः ॥४९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सानन्दं सदनं सुतास्तु सुधियः कान्ताप्रियालापिनी
इच्छापूर्ति धनं स्वयोषित रतिः स्वाज्ञापरा सेवकाः
आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोसंगमुपासते च सततं धन्यो गृहस्थाश्रमः ॥५०॥

विद्या न हेया कविभिः कदाचित्
निरक्षरान् वीक्ष्य धनादिकानाम् ॥
आवद्धमुक्तां गणिकां विलक्ष्य
कुलांगना किं कुलटा भवन्ति ॥५१॥

वयं ते नो विप्रा प्रति दिवस मासाद्य कृपणान्
धनं ये याचन्ते प्रति गणित नक्षत्र तिथयः ॥५२॥

अदृष्ट पूर्वा बहवः सहायाः
सर्वे पदस्थस्य भवन्ति मित्रा
अर्थे विहीनस्य पद च्युतस्य
भवत्यकाले स्वजनोऽपि शत्रुः ॥५३॥

वृक्षं क्षीण फलं त्यजन्ति विहगाः शुष्कं सरः सारसाः
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं मंत्रिणः
पुष्पं पर्य्युषितं त्यजंति मधुपाः दग्धं वनान्तं मृगाः
सर्वः कार्यवशाज्जनोहि रमते कस्यास्ति को "वल्लभः ॥५४॥

सद्भावेन हि तुष्यन्ति देवा सत्पुरुषाद्विजाः
इतरा खाद्य पानेन मान दानेन पण्डिताः ॥५५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिक्षयन्ति च याचन्ति देहीति कृपणा जनाः
अवस्थे यम दानस्य माभूदेवं भवानपि ॥५६॥

दुर्गं त्रिकूटः परिखा समुद्रो रक्षांसि योधाः परमा च वृत्तिः
शास्त्रं च वैतूशनसा प्रदिष्टं स रावणः कालवशात् विनष्टः ५७

जीर्णं शीर्णं कुटीरं त्वहि कुल नकुलं
व्याकुलं धान्य हीनम्
कंथा वासः कदन्नं प्रतिदिनमटनम्
हण्डिका खण्डितैका ॥
काणी काली कराली कटु वचनरता
गेहिनी स्नेहशून्या
तिष्ठत्येषा विभूतिस्तदपि न गृहिणो
गेह वासं त्यजन्ति ॥५८॥

धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं च दूरे गतम्
पृथ्वी मन्दफला नराः कपटिनः वित्तं च शाठ्योर्जितम् ॥
राजानोऽर्थपरा ह्यरक्षणपराः पुत्राः पितुर्द्वेषिणः
साधुः सीदति दुर्जनः प्रभवति प्राप्तौ कलौ दुर्युगे ॥५९॥

न देवे देवत्वं कपटपटवस्तापसजनाः
जनो मिथ्यावादी विरलतर वृष्टिर्जलधरः ॥
प्रसन्ना नीचा वै अवनिपतयाः दुष्टमतयो
जनाः शिष्टा नष्टा अहह ! कलिकालो विलसति ॥६०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

कोई कहे राम राम — कोई कृष्ण कृष्ण कहे
कोई कहे शिव शिव — अपने मुखारविन्द ॥
कोई हरि हर कहे — नारायण कहे कोई
कोई परब्रह्म ध्यावे — मूंदि नयनारविन्द ॥
कोई जप तप करे — पूजा पाठ रात दिन
पद से करे सुतीरथ — दान दे करारविन्द ॥

काहे न मांगत भीख फिरे
घर में नहीं अन्न न एक अधेलो
मुख एक जो होय तो काम चले
मुख ही मुख को घर मांहि झमेलो ॥
शीश चढे सहसानन है और
गजानन गोद लिए है गदेलो
चतुरानन बाप पंचानन आप
षडानन पूत दशानन चेलो ॥

अंजनि कुमार पुकार सुनो सब ओरन से अब आय बनी है
ऐसो जगमे कोई नही जिस जाय कहु सबको अपनी ही बनी है
मेरी वेर न देर करो प्रभु वेर की वेर तो और घणी है
आप किसी के भरोसे रहेंगे तो मोर गरीब का कौन धनी है

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

देनो चहे जगदीश चिन्हे सुख सो तो रहीम टरे नही टारे
उद्यम पौरुष किये बिना सुख आवत आपही पाँव पसारे ॥
देव कहे अपने अपने विधि के परपंच न जात विचारे
बेटा भयो वसुदेव के धाममे दुन्दुभी बाजत नन्दके द्वारे ॥१॥

२

गावे गुनी गनिका गन्धर्व औ सारद शेष सवै गुण गावै
नाम अनन्त गनन्त गणेश ज्यों ब्रह्मा त्रिलोचन पार न पावै ॥
जोगी जती तपसी अरु सिद्ध निरन्तर जांहि समाधि लगावै
तांहि अहीरकी छोहरीयाँ लुटिया भर छाछ पै नाचनचावै ॥

३

शेष महेश गणेश दिनेश सुरेश हु जांहि निरन्तर ध्यावे
जांहि अनादि अखण्ड अनन्त अभेद्य अछेद्य सुवेद बतावे ॥
नारद से शुक व्यास रटे पचि हारे तऊ पुनि पार न पावे
तांहि अहीर की छोकरीया लुटियाभर छाछ पर नाच नचावे

४

चाहे तो रंक को राव करे अरु रावको द्वार ही द्वार फिरावे
चींटीके पाँव मैं बान्धि गयन्दको यादव की सरि मांहि तिरावै
फूकी उडावत ड़ंश सुमेर को व्याल खगेश हि मारि गिरावे
यह महिमा रघुनन्दन की यदि चाहे तो कूए मे सिन्धु सिरावै

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

५

विभूति लगावत शंकर के अहिलोचन मांझ गिर्‍यो झरिके
अहिके फूंफकार लग्यो शशिमे तव अमृत बून्द गिर्‍यो ढरिके
उह्वा जोरहयो मृगराज को खाल उठ्यो गडराय तडातडिके
सुरभी सुतनन्दन भागी चले तव गौरी हंसी मुख आंचल देके

६

कह उठी कौशलपुर की सखियां हम अचरज एक सुनाती है
है वहिनो जहां खीर के द्वारा बेटे पैदा हो जाते है ॥
तब हंसकर कहा शत्रुहन ने अचरज है इससे बडा यहाँ
बेटी समेत धरणी मे से निकला करता घडा यहाँ ॥

७

पाँव दिए चलने फिरने और हाथ दिए हरिकृत्य करायो
कान दिए सुनिए हरि को जस नैन दिए तिन मार्ग दिखाओ
नाक दिए शोभनता करी अरु जीभ सदा हरिको गुण गायो
सुन्दर साज दियो परमेश्वर पेट दियो यह पाप लगायो ॥

८

ज्ञान बढे गुणवान की संगति लोभ बढे धनमे चित्त दीन्हे
क्रोध बढे नरमूढ की संगति काम बढे तियको संग कीन्हे
मोह बढे परिवार की संगति लोभ बढे धनमे चित दीन्हे
बुद्धि विवेक विचार बढे कवि दीन सुसज्जन संगति कीन्हे ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९

पंछी के पान समुद्र घटे नही भानु घटे नही बादल छाये
अग्नि मे स्वर्ण की आव घटे नही विद्या घटे नही लाख पढाये
सुपुत्र को तेज घटे न तिमिर मे रैन घटे नही दीप जलाए
दान दिए नही द्रव्य घटे अरु मान घटे ना उपकार कमाए

१०

दरिद्र कहे धनवान सुखी धनवान कहे सुख राज मे भारी
राजा कहे चक्रवरती सुखी चक्रवरती कहे इन्द्रदेव सुखारी ॥
इन्द्र कहे ब्रह्मदेव सुखी ब्रह्मदेव कहे सुख विष्णु को भारी
माणिकदास विचार कहे हरि भक्ति विना सब जगत दुःखारी

११

मात पिता युवती सुत वान्धव लागत है सबही अति प्यारो
लोग कुटुम्ब सबे हित राखत होय नही कवहूँ यह न्यारो ॥
नेह सनेह जहां लगि जानहु जो लग हे मुख शव्द उचारो
सुन्दर चेतन शक्ति गई तव बेगि कहे घर से ही निकारो ॥

१२

दीन दयाल सुने जबसे तबसे हियमे कछु ऐसी उठी है
अव तेरो कहायके जाऊ कहां इक तेरोहि नामकी फैटकसी है
तेरो ही एक भरोसो मुझे अरु तेरे समान न दूजो जसी है
ऐहो मुरारि पुकारी कहूँ अव मेरी हंसी नही तेरी हंसी है

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१३

तात मिले अरु मात मिले सुत भ्रात मिले युवती सुखदाई
राज मिले गज वाज मिले सब साज मिले मनवांछित पाई ॥
लोक मिले विधि लोक मिले सुरलोक मिले वैकुन्ठ ही जाई
सुन्दर और मिले सब ही पर सन्त समागम दुर्लभ भाई ॥

१४

नीर मे छीर मिलाय दियो तव आपुन रूप सभी दरसायो
